महादेवानन्द कृत

तत्त्वानुसन्धानम्

प्रथमः परिच्छेदः

ब्रह्माहं यत्प्रसादेन मयि विश्वं प्रकल्पितम्।
श्रीमत्स्वयम्प्रकाशाख्यं प्रणौमि जगतां गुरुम्॥

देहो नाहं श्रोत्रवागादिकानि नाहं बुद्धिर्नाहमध्यासमूलम्।
नाहं सत्यानन्दरूपश्चिदात्मा मायासाक्षी कृष्ण एवाहमस्मि॥

अथ मोक्षस्य वाक्यार्थज्ञानाधीनत्वात् तस्य च पदार्थज्ञानाअधीनत्वात् तदर्थं तत्पदार्थं निरूपयामः।

तत्पदार्थस्य लक्षणं द्विविधं। तटस्थलक्षणं, स्वरूपलक्षञ्चेति।

सृष्टिस्थितिलयकारणत्वं तटस्थलक्षणम्। 'यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति' इति श्रुतेः (तै.उप. 3.1.1)। तदुक्तं भगवता सूत्रकारेण 'जन्माद्यस्य यतः' (ब्र.सू. 1.1.2) इति।

सत्यज्ञानानन्दाः स्वरूपलक्षणम्। 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. उप. 2.1.1) 'आनन्दो ब्रह्मेति व्यजानात्' (तै. उप. 3.6.1) इत्यादि श्रुतेः। उक्तं च – 'आनन्दादयः प्रधानस्य' (ब्र.सू. 3.3.11) इति।

स च द्विविधः। वाच्यार्थो लक्ष्यार्थश्चेति। मायोपहितं चैतन्यं तत्पदवाच्यार्थः। मायाविनिर्मुक्तं चैतन्यं तत्पदलक्ष्यार्थः।

अथ केयं माया? शृणु। यथा शुक्त्यादौ रजतादि कल्पितं तथा चेतने अचेतनं कल्पितम्। 'इदं सर्वं यदयमात्मा' (बृ.उप. 4.5.7) 'आत्मैवेदं सर्वं,' (छां.उप. 7.25.2) 'ब्रह्मैवेदं सर्वं,' (नृ.उ.ता.उप. 7) 'पुरुष एवेदं विश्वं,' (मु.उप. 2.1.10) 'सर्वं खल्विदं ब्रह्म', (छां.उप. 3.14.1) 'वासुदेवः सर्वम् इति', (भ.गी. 7.19) 'नारायणः सर्वमिदं पुराण' (ब्र.सू.शां.भा. 2.1.1) इत्यादिश्रुतिस्मृतिवाक्यशतैः अचेतनस्य चेतनव्यतिरेकेण अभावप्रतिपादनात्। चेतनाचेतनयोः अभेदायोगाच्च।

चेतनं नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दानन्ताद्वयं ब्रह्म। अचेतनम् अज्ञानादि जडजातम्।

अज्ञानं त्रिगुणात्मकं, सदसद्भ्याम् अनिर्वचनीयं, भावरूपं, ज्ञाननिवर्त्यम्। 'अहं ब्रह्म न जानामि' इत्यनुभवात्। 'देवात्मशक्तिं स्वगुणैर्निगूढाम्' (श्वे.उप. 1.3) इत्यादि श्रुतेः। 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः। ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।।' (भ.गी. 5.15-16) इत्यादिस्मृतेश्च।

तच्च अज्ञानं द्विविधं, मायाविद्याभेदात्। शुद्धसत्त्वप्रधानं सत् मायेत्युच्यते। मलिनसत्त्वप्रधानं सत् अविद्येत्युच्यते। 'जीवेशावभासेन करोति माया चाविद्या च स्वयमेव भवति' (नृ.उ.ता.उप. 9) इति श्रुतेः।

अथवा, अज्ञानस्य शक्तिः द्विविधा, ज्ञानशक्तिः क्रियाशक्तिः च इति। रजस्तमोभ्याम् अनभिभूतसत्त्वं ज्ञानशक्तिः। 'सत्त्वात्सञ्जायते ज्ञानम्' (भ.गी. 14.17) इति स्मृतेः।

क्रियाशक्तिः द्विविधा। आवरणशक्तिः, विक्षेपशक्तिश्चेति। रजःसत्त्वाभ्याम् अनभिभूतं तमः आवरणशक्तिः। तदुक्तम्, 'कृष्णं तमः आवरणात्मकत्वात्' (ब्र.सू.शां.भा 1.4.8) इति। सा च नास्ति न प्रकाशत इति व्यवहारहेतुः। तथा चोक्तम् – 'न भाति नास्ति कूटस्थ इत्यापादनमा-वृत्तिः' (पञ्चदशी 6.26) इति।

तमःसत्त्वाभ्याम् अनभिभूतं रजः विक्षेपशक्तिः। 'रजसो लोभ एव च' (भ.गी. 14.17) इति स्मृतेः। लोभादीनां विक्षेपकत्वं प्रसिद्धमेव। सा च आकाशादिप्रपञ्चोत्पत्तिहेतुः। उक्तं च, 'विक्षेपशक्तिः लिङ्गादि ब्राह्माण्डान्तं जगत् सृजेत्।' (वाक्यसुधा 13) इति।

तथा च पूर्वोक्ताज्ञानम् आवरणशक्तिप्रधानं सत् अविद्या इत्युच्यते, विक्षेपशक्तिप्रधानं सत् माया इत्युच्यते।

एतदभिप्राया स्मृतिरपि। 'तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते। योगी माययमेयाय तस्मै विद्यात्मने नम' (वि.पु. 5.17.15) इत्येवंरूपा द्रष्टव्या।

एवं च मायोपहितं चैतन्यम् ईश्वरः जगत्कारणम्, अन्तर्यामी इति उच्यते। स एव तत्पद-वाच्यार्थः।

अविद्योपहितं चैतन्यं जीवः प्राज्ञ इत्युच्यते। तदुक्तम् – (पञ्चदशी 1.15-17)
तमोरजः सत्त्वगुणा प्रकृतिर्द्विविधा च सा। सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते॥

मायाबिम्बो वशीकृत्य तां स्यात् सर्वज्ञ ईश्वरः। अविद्यावशगस्त्वन्यः तद्वैचित्र्यात् अनेकधा॥ इति।

'अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः,' 'मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्' (श्वे.उप. 4.9-10) इत्येवमादिश्रुतयः उक्ताभिप्राया द्रष्टव्याः।

यद्वा, यथा एक एव देवदत्तः क्रियानिमित्तवशेन पाठको, पाचक इति व्यपदिश्यते तथा एकमेव अज्ञानं विक्षेपावरणशक्तिनिमित्तभेदेन मायाविद्येति च व्यपदिश्यते। तथा च अविद्याप्रति-बिम्बितं चैतन्यं जीवः। मायोपहितं चैतन्यं ईश्वरः। 'आभास एव च', (ब्र.सू. 2.3.50) 'अत एव चोपमा सूर्यकादिवत्', (ब्र.सू. 3.2.18) 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधै-कोऽनुगच्छन्। उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा'।(ब्र.सू.शां.भा. 3.2. 18) 'एक एव हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवत्' (अ.बिं.उप. 12) इत्यादि श्रुतिसूत्रयोः सत्त्वात्। अस्मिन् पक्षे जीवस्तु एक एव, तस्मिन् अन्तःकरणविशिष्टाः प्रमातारः कल्पिताः।

केचित्तु नानाऽज्ञानं स्वीकृत्य वनवत् अज्ञानसमुदायः समष्टिः, तदुपहितं चैतन्यम् ईश्वरः, वृक्ष-वत् प्रत्येकम् अज्ञानं व्यष्टिः तदुपहितं चैतन्यं प्राज्ञ इति वदन्ति।

अन्ये तु कारणीभूताज्ञानोपहितं चैतन्यम् ईश्वरः, अन्तःकरणोपहितं चैतन्यं जीवः, 'कार्योपा-धिरयं जीवः कारणोपाधिरीश्वर' (शुक. उप. 3.12) इति वचनात् इत्याहुः।

सर्वथा मायोपहितं चैतन्यम् ईश्वरः। स च ज्ञानशक्ति[मदज्ञान]उपहितस्वरूपेण जगत्कर्ता, विक्षेपादिशक्तिमदज्ञानोपहितस्वरूपेण जगदुपादानम् ऊर्णनाभिवत्, 'यथोर्णनाभिः सृजते गृह्णते च' (मु.उप. 1.1.7) इत्यादि श्रुतेः। 'यः सर्वज्ञः सर्ववित्', (मु.उप. 2.2.7) 'स विश्व-कृत् स हि सर्वस्य कर्ता' (बृ.उप. 4.4.13) इत्यादि श्रुतिभ्यश्च।

एवं पूर्वोक्तात् ईश्वरादाकाश उत्पद्यते। आकाशाद्वायुः, वायोरग्निः, अग्नेराप, अद्भ्यः पृथिवी च, 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' (तै.उप. 2.1.1) इत्यादिश्रुतेः। मायायाः सत्त्व-रजस्तमोगुणात्मकत्वात् तत्कार्याणि आकाशादीन्यपि सत्त्वरजस्तमोगुणात्मकानि अपञ्ची-कृतानि सूक्ष्मभूतानि, इति च वर्णयन्ति।

एतेभ्यः सूक्ष्मभूतेभ्यः स्थूलभूतानि, सूक्ष्मशरीराणि च सप्तदशलिङ्गात्मकानि जायन्ते। सप्तदश-लिङ्गानि तु ज्ञानेन्द्रियाणि पञ्च, कर्मेन्द्रियाणि पञ्च, मनः, बुद्धिः, पञ्चप्राणाश्चेति।

तथा च आकाशादिसात्त्विकांशेभ्यः व्यस्तेभ्यः ज्ञानेन्द्रियाणि उत्पद्यन्ते। आकाशसात्त्विकां-शात् श्रोत्रम् उत्पद्यते। वायोः सात्त्विकांशात् त्वगिन्द्रियम्। तेजसः सात्त्विकांशात् चक्षुः। अपां सात्त्विकांशात् रसनम्। पृथिवीसात्त्विकांशात् घ्राणम्। 'श्रोत्रमाकाश' (शारी.उप. 1) इत्यादिश्रुतेः।

आकाशादीनां सात्त्विकांशेभ्यः मिलितेभ्यः अन्तःकरणम् उत्पद्यते। तत् सङ्कल्पविकल्पनिश्च-याभिमानानुसन्धानरूपवृत्तिभेदात् चतुर्विधम्।

मनोबुद्धिरहङ्कारश्चित्तं चेति चतुर्विधम्। सङ्कल्पाख्यं मनोरूपं बुद्धिर्निश्चयरूपिणी॥

अभिमानात्मकस्तद्वदहङ्कारः प्रकीर्तितः। अनुसन्धानरूपं च चित्तमित्यभिधीयते॥ इति (पञ्ची.वा. 33-34) वार्तिकवचनात्।

पूर्वोक्ताकाशादिराजसांशेभ्यः व्यस्तेभ्यः कर्मेन्द्रियाणि उत्पद्यन्ते। आकाशराजसांशात् वागि-न्द्रियमुत्पद्यते। वायोः राजसांशात् हस्तौ। तेजसो राजसांशात् पादौ। अपां राजसांशात् पायुः। पृथिव्या राजसांशात् उपस्थः। 'वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि तेषां क्रमेण' (शारी.उप. 1) इत्यादिश्रुतेः।

आकाशादिराजसांशेभ्यः मिलितेभ्यः प्राण उत्पद्यते। सोऽपि वृत्तिभेदात् पञ्चविधः। पराग्गम-नवान् नासाग्रस्थानवर्ती **प्राणः**। अवाग्गमनवान् पाय्वादिस्थानवर्ती **अपानः**। विष्वग्गमनवान् सर्वशरीरवर्ती **व्यानः**। ऊर्ध्वगमनवान् कण्ठवर्ती **उदानः**। अशितपीतान्नपानादिसमीकरणकरः अखिलशरीरवर्ती **समानः**।

अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाः कोशाः पञ्च अत्रैव अन्तर्भवन्ति। वक्ष्यमाणं स्थू-लशरीरम् अन्नमयकोशः। उक्तं सूक्ष्मशरीरं कोशत्रयात्मकम्। कर्मेन्द्रियैः सहितः प्राणः प्राण-मयकोशः। कर्मेन्द्रियैः सहितं मनः मनोमयकोशः। ज्ञानेन्द्रियैः सहिता बुद्धिः विज्ञानमय-कोशः। अयमेव कर्तृत्वोपाधिः। 'विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च' (तै.उप. 2.5) इत्यादिश्रुतेः।

अन्तःकरणस्य सत्त्ववृत्तिः द्विविधा। निश्चयाकारवृत्तिः, सुखाकारवृत्तिश्चेति। निश्चयवृत्तिमत्-अन्तःकरणं बुद्धिरित्युच्यते। सुखाकारवृत्तिमदन्तःकरणं भोक्तृत्वोपाधिः। 'तस्य प्रियमेव शिरः, मोदो दक्षिणः पक्षः, प्रमोद उत्तरः पक्षः, आनन्द आत्मा, ब्रह्म पुच्छं प्रतिष्ठा' (तै.उप. 2.5) इत्यादिश्रुतेः। अयमेव कारणपर्यन्त आनन्दमयकोशः। केचित्तु अज्ञानम् आनन्दमय-कोशं वदन्ति।

इदं सूक्ष्मशरीरं सप्तदशलिङ्गं द्विविधं समष्टिव्यष्टिभेदात्। अपञ्चीकृतपञ्चमहाभूततत्कार्यं सप्तदश-लिङ्गं समष्टिः इत्युच्यते। एतदुपहितं चैतन्यं हिरण्यगर्भ इत्युच्यते, प्राणः, सूत्रात्मा इति च ज्ञानक्रियाशक्तिमदुपहितत्वात् व्यापित्वाच्च।

अथवा पूर्वोक्तापञ्चीकृतभूतेभ्यः सर्वव्यापकं लिङ्गशरीरं पृथगेव उत्पन्नं तदेव समष्टिः इत्युच्यते।

समष्टित्वं नाम गोत्वादिवत् सर्वव्यष्टिषु अनुस्यूतत्वम्। तदुक्तम्, 'तेभ्यः समभवत् सूत्रं लिङ्गं सर्वात्मकं महत्' (पञ्ची.वा. 6) इति।

केचित्तु वनवत् लिङ्गशरीरसमुदायः समष्टिरिति वदन्ति।

प्रत्येकं लिङ्गशरीरं व्यष्टिः इत्युच्यते। व्यष्टित्वं नाम व्यक्तिवद्यावृत्तत्वम्। एतदुपहितं चैतन्यं तैजस इति उच्यते। तेजोमय अन्तःकरणोपाधित्वात्। सामान्यविशेषयोरिव जातिव्यक्त्योरिव च समष्टिव्यष्ट्योः तादात्म्याभ्युगमात्, तदुपहितयोः तैजससूत्रात्मनोः अपि तादात्म्यम्।

एतदेव सूक्ष्मशरीरम् अविद्याकामकर्मसहितं पुर्यष्टकम् इत्युच्यते। ज्ञानेन्द्रियपञ्चकं, कर्मेन्द्रिय-पञ्चकं, अन्तःकरणचतुष्टयं, प्राणादिपञ्चकं, भूतसूक्ष्मपञ्चकं, अविद्या, कामः, कर्म च इति एतानि अष्टौ।

तत्र कार्याऽविद्या द्रष्टव्या। सा चतुर्विधा। अनित्ये नित्यत्वबुद्धिः, अशुचौ शुचित्वबुद्धिः, असुखे सुखत्वबुद्धिः, अनात्मनि आत्मबुद्धिः चेति। तदुक्तम्, 'अनित्याऽशुचिदुःखानात्मसु नित्य-शुचिसुखात्मख्यातिरविद्या' (यो.सू. 2.5) इति। अस्यार्थः - अनित्ये ब्रह्मलोकादिसंसारफले नित्यत्वबुद्धिः एका अविद्या द्रष्टव्या। अशुचिषु स्व-शरीरपुत्रभार्यादिशरीरेषु शुचित्वबुद्धिः अपरा। दुःखेषु दुःखसाधनेषु च सुखतत्साधनबुद्धिः अन्या। अनात्मनि देहेन्द्रियादौ अहमित्यात्मबुद्धिः इतरा चेति अविद्या चतुर्विधा इति।

कामो रागः।

कर्म त्रिविधं। सञ्चितम्, आगामि, प्रारब्धश्चेति। स्वकृतं फलं अदत्वा अदृष्टरूपेण विद्यमानं सञ्चितं कर्म। आगामि, अस्मिन् शरीरे क्रियमाणं कर्म। वर्तमानशरीरारम्भकं प्रारब्धं कर्म। सञ्चितागामिकर्मणोः फलभोगेन वा विरोधिकर्मान्तरेण वा ब्रह्मज्ञानेन वा विनाशः। प्रारब्धस्य तु भेगेनैव विनाशः। किं बहुना। प्रारब्धव्यतिरिक्तानां (कर्मणां) अविद्यादीनं पञ्चक्लेशानां (च) तत्त्वज्ञानात् नाशः।

तथाहि, 'अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः।' (यो.सू. 2.3) कार्यकारणरूपा द्विविधा अविद्या निरूपिता। अहङ्कारस्य सूक्ष्मावस्था अस्मिता। इदमेव महत्तत्त्वं सामान्याहङ्कार इति च उच्यते। राग उक्तः। द्वेषः क्रोधः। स्वीकृतस्य पुनस्त्यागासहिष्णुत्वम् अभिनिवेशः। एतेषां पञ्चानां ब्रह्मसाक्षात्कारात् निवृत्तिः। 'ज्ञात्वा देवं मुच्यते सर्वपाशैः' (श्वे.उप. 2.15) इत्यादि-श्रुतेः। पाशैः पञ्चक्लेशैः इत्यर्थः।

तिष्ठतु तावत् प्रासङ्गिकम्। एवं सूक्ष्मशरीरोत्पत्तिर्निरूपिता।

पञ्चीकृतभूतानि स्थूलभूतानि। पञ्चीकरणं तु पूर्वोक्तानाम् आकाशादीनां तामसांशान् एकैकं द्विधा समं विभज्य, तत्र एकैकं पुनश्चतुर्धा विभज्य, स्वांशं परित्यज्य इतरांशेषु संयोजनम्। तेषां पृथ्वी मलंमांसमनः, जलं मूत्रंलोहितम्प्राणाः, तेजः अस्थिमज्जावाक्। 'तासां त्रिवृतं त्रिवृतमे-कैकां करवाणि' (छां.उप. 6.3.3) इति त्रिवृत्करणश्रुतेः पञ्चीकरणस्यापि उपलक्षणत्वात् पञ्ची-करणं प्रामाणिकमेव।

'वैशेष्यात्तु तद्वादस्तद्वाद' (ब्र.सू. 2.4.22) इति न्यायेन स्वांशभूयस्त्वात् विशेषव्यपदेशोऽपि सम्भवति। एवं च सति आकाशे शब्दोऽभिव्यज्यते। वायौ शब्दस्पर्शौ। तेजसि शब्दस्पर्श-रूपाणि। जले शब्दस्पर्शरूपरसाः। पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च।
तथा पञ्चीकृतपृथिव्यादिभ्यो ब्रह्माण्डमुत्पन्नं तदन्तर्वर्तिलोकाः चतुर्दश। ब्रह्माण्डात् मनुशत-

रूपे जाते। ब्रह्माण्डान्तर्वर्तिपृथिव्या ओषधय उत्पन्नाः। ओषदीभ्यो अन्नम्। पितृभ्यां भुक्तान्न-परिणामरेतःशोणितद्वारा स्थूलशरीरम् उत्पन्नम्। तच्चतुर्विधम्। जरायुजमण्डजंस्वेदजमुद्भिज्जं चेति। मनुष्यादिशरीरं जरायुजम्। पक्षिपन्नगादिशरीरम् अण्डजम्। यूकामशकादिशरीरं स्वेदजम्। तृणगुल्मादि शरीरम् उद्भिज्जम्।

उक्तं स्थूलशरीरं पुनः प्रकारान्तरेण द्विविधं समष्टिव्यष्टिभेदात्।

पञ्चीकृतपञ्चमहाभूततत्कार्यं ब्रह्माण्डं तदन्तर्वर्तिकार्यं सर्वं समष्टिः इत्युच्यते। अथवा व्यक्तिषु गोत्वादिवत् सर्वव्यष्टिषु अनुस्यूतं पञ्चीकृतभूतकार्यं ब्रह्माण्डात्मकं व्यापकं समष्टिः। वनवत् सकलस्थूलशरीरसमुदायो वा समष्टिः इत्युच्यते। एतदुपहितं चैतन्यं विराट्, वैश्वानर इति च उच्यते, विविधं राजमानत्वात् सर्वनराभिमानित्वात् च।

प्रत्येकं स्थूलशरीरं गवादिव्यक्तिवत् व्यावृत्तं व्यष्टिः इत्युच्यते। एतदुपहितं चैतन्यं विश्व इत्युच्यते, सूक्ष्मशरीरम् अपरित्यज्य स्थूलशरीरप्रविष्टत्वात्।

अनयोः समष्टिव्यष्ट्योः सामान्यविशेषयोः इव तादात्म्याभ्युपगमात् एतदुपहितविश्ववैश्वानरयोः अपि तादात्म्यम्।

एक एव जीवः जाग्रदवस्थायां स्थूलसूक्ष्मकारणाविद्याअभिमानी सन् 'विश्व' इत्युच्यते। स एव स्वप्नावस्थायां सूक्ष्मशरीरकारणाविद्याभिमानी सन् 'तैजस' इत्युच्यते। स एव सुषुप्तौ कारणाविद्याभिमानी सन् 'प्राज्ञ' इत्युच्यते। स एव शरीरत्रयाभिमानरहितः सन् शुद्धः परमात्मा भवति।

तस्यैव अभिमानिनो जीवस्य अवस्थाः पञ्च। जाग्रत, स्वप्न, सुषुप्ति, मूर्च्छा, मरणभेदात्। दिगाद्यधिष्ठातृदेवतानुगृहीतैः इन्द्रियैः शब्दादिविषयानुभवावस्था जाग्रदवस्था। जाग्रद्भोगप्रदकर्मोपरमे सति इन्द्रियोपरमे जाग्रदनुभवजन्यसंस्कारोद्भूतविषयतज्ज्ञानावस्था स्वप्नावस्था। जाग्रत्-स्वप्नोभयभोगप्रदकर्मोपरमेण स्थूलसूक्ष्मशरीराभिमाननिवृत्तिद्वारा विशेषविज्ञानोपरात्मिकाबुद्धेः कारणात्मना अवस्थितिः सुषुप्तिः। मुद्गरप्रहारादिजनितविषादेन विशेषविज्ञानोपरमावस्था मूर्च्छावस्था। तदुक्तम् 'मुग्धेऽर्धसम्पत्तिः परिशेषात्' (ब्र.सू. 3.2.10) इति। एतच्छरीरभोग-प्रापककर्मोपरमेण द्विविधदेहाभिमाननिवृत्त्या सम्पिण्डितकरणग्रामावस्था भाविशरीरप्राप्ति-पर्यन्तं मरणावस्था।

केचित्तु अस्या उक्तावस्थासु अन्तर्भावं वदन्ति। अत्र श्रुतिस्मृतिपुराणप्रमाणानि प्रसिद्धानि।

एक एव परमात्मा समष्टिस्थूलसूक्ष्मशरीरतत्कारणमायोपहितः सन् वैश्वानर इत्युच्यते। 'अह-मेव वैश्वानरोऽस्मि' इत्येतदुपासनया तत्प्राप्तिः फलं भवति। वैश्वानराधिकरणे (ब्र.सू. 1.2.7. 24-32) सूत्रकारभाष्यकाराभ्यां श्रुत्यर्थस्य तथा प्रतिपादनात्।

स एव परमात्मा समष्टिसूक्ष्मशरीरतत्कारणमायोपहितः सन् हिरण्यगर्भ इत्युच्यते। एतदुपास-नया तत्प्राप्तिः फलम् भवति। 'अन्तर उपपत्तेः' इत्यस्मिन्नधिकरणे (ब्र.सू. 1.2.4.13-17) सूत्रकारभाष्यकाराभ्यां उपकोशलविद्यायां (छां.उप. 4.15) तथैव प्रतिपादनात्।

स एव केवलमायोपाधिकः सन् ईश्वर इत्युच्यते। तदुपासनया तत्प्राप्तिः फलं भवति। 'सर्वत्र प्रसिद्धोपदेशात्' (ब्र.सू. 1.2.1) इति शाण्डिल्यविद्यायां, 'दहर उत्तरेभ्य' (ब्र.सू. 1.3.14) इति दहरविद्यायां च सूत्रकारभाष्यकाराभ्यां यथोक्तेश्वरोपासनया तत्प्राप्तेः प्रतिपादनात्। 'तं यथा यथोपासते तत्तदेव भवति' इति श्रुतेश्च।

भावनामान्द्ये तु तत्तारतम्येन सार्ष्टिसारूप्यसामीप्यसालोक्यफलानि भवन्ति। 'साम्नः सायुज्यं

सलोकतां जयति' (बृ.उप. 1.3.22) इत्यादिश्रुतेः।

ये पुनः साधनचतुष्टयसम्पन्ना विचारासमर्था मन्दप्रज्ञाः तेषां गुरुमुखात् ब्रह्म निश्चित्य सर्वोपाधिविनिर्मुक्तं सच्चिदानन्दलक्षणं ब्रह्माहमस्मि इति निर्गुणब्रह्मोपासनया अस्मिन्नेव शरीरे जीवद्(जीवा)वस्थायां मरणावस्थायां वा ब्रह्मलोके वा उत्पन्नब्रह्मसाक्षात्कारेण तत्प्राप्तिः फलं भवति। श्रुतिन्यायसाम्यात्।

'ओमित्येवेनैवाक्षरेण परं पुरुषमभिध्यायीत', (प्र.उप. 5.5) 'स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते', (प्र.उप. 5.5) 'ओमित्यात्मानं युञ्जीत', (महा.ना.उप. 79.18) ओमित्येवं ध्यायथात्मानम्' (मु.उप. 2.2.6) इत्यादिश्रुतिभ्यः।

भगवतापि उक्तम् – (भ.गी. 8.13, 13.25)
ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्। यः प्रयाति त्यजन् देहं स याति परमां गतिम्॥ इति

अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते। तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणा॥ इति च।

एवं तत्पदार्थस्य मायोपहितस्य ब्रह्मणः तटस्थलक्षणं जगज्जन्मादिकारणत्वं निरूपितम्। अयमेव अध्यारोप इत्युच्यते।

अस्यापवादश्च इदानीमुच्यते। अपवादो नाम अधिष्ठाने भ्रान्त्या प्रतीतस्य तद्व्यतिरेकेण अभावनिश्चयः। यथा शुक्त्यादौ भ्रान्त्या प्रतीतस्य रजतादेः शुक्तिव्यतिरेकेण नेदं रजतं किन्तु शुक्ति इति अभावनिश्चयः। अयमेव बाधः, विलापनम् इति च उच्यते।

स च बाधस्त्रिविधः। शास्त्रीयो, यौक्तिकः, प्रत्यक्षश्चेति। 'अथात आदेशो नेति नेति', (बृ.उप. 2.3.6) 'नेह नानास्ति किञ्चन' (बृ.उप. 4.4.19) इत्यादि शास्त्राद् ब्रह्मव्यतिरेकेण प्रपञ्चाभावनिश्चयः शास्त्रीयो बाधः। मृद्व्यतिरेकेण घटाभावनिश्चयवत् निखिलकारणीभूतब्रह्मव्यतिरेकेण निखिलप्रपञ्चाभावं निश्चित्य दृश्यमानस्य मिथ्यात्वनिश्चयेन ब्रह्मात्ममात्रनिश्चयो यौक्तिको बाधः। 'अहम् ब्रह्मास्मि' (बृ.उप. 1.4.10) इति 'तत्त्वमसि' (छां.उप. 6.8.7) इत्यादि वाक्यजन्यसाक्षात्कारेण अज्ञानतत्कार्यनिवृत्तिः प्रत्यक्षबाधः।

यौक्तिकबाधस्य अयं क्रमः. स्थूलप्रपञ्चं सर्वमपि स्थूलभूतेषु विलाप्य, तद्व्यतिरेकेण तन्नास्तीति निश्चित्य, स्थूलभूतानि समष्टि-व्यष्टि-सूक्ष्मशरीरं च सूक्ष्मभूतेषु विलाप्य, तत्रापि पृथिवीमप्सु विलाप्य, अपस्तेजसि, तेजो वायौ, वायुमाकाशे, आकाशमज्ञाने, अज्ञानं चिन्मात्रे विलापयेत्।

तथा च स्मृतिः – (महाभारत, शां.प. 339.29)
जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते। ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते॥
वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते। अव्यक्तं पुरुषे ब्रह्मन् निष्कले सम्प्रलीयत॥ इति

उक्तञ्च – (पञ्ची.वा. 49-50)
अकारं पुरुषं विश्वम् उकारे प्रविलापयेत्। उकारं तैजसं सूक्ष्मं मकारे प्रविलापयेत्।
मकारं कारणं प्राज्ञं चिदात्मनि विलापयेत्॥ इति

आभ्याम् अध्यारोपापवादाभ्यां तत्त्वम्पदार्थशोधनमपि सिद्धं भवति। तथा हि, मायादिसमष्टिः तदुपहितं चैतन्यम् एतदाधारानुपहितम् अखण्डचैतन्यं च तस्यायः पिण्डवदेतत्त्रयम् अविविक्तं एकत्वेन अवभासमानं तत्पदवाच्यार्थो भवति। विविक्तम् अखण्डं चैतन्यं तत्पदलक्ष्यार्थो भवति।

अविद्यादिव्यष्टिः एतदुपहितचैतन्यम् एतदाधारानुपहितं प्रत्यक्चैतन्यम् एतत्त्रयं तप्तायःपिण्डवत् अविविक्तम् एकत्वेन अवभास्मानं त्वम्पदवाच्यार्थो भवति। विविक्तं प्रत्यक्चैतन्यं त्वम्पद-लक्ष्यार्थो भवति।

एतौ लक्ष्यार्थौ उपादाय सम्बन्धत्रयेण सहितं तत्त्वमस्यादिवाक्यं लक्षणया अखण्डार्थबोधकं भवति।

सम्बन्धत्रयं तु, पदयोः सामानाधिकरण्यम्। सामानाधिकरण्यं नाम भिन्नप्रवृत्तिनिमित्तानां शब्दानां एकस्मिन्नर्थे वृत्तिः। यथा 'सोऽयं देवदत्त' इत्यत्र तत्कालविशिष्टदेवदत्तवाचक 'स' शब्दस्य एतत्कालविशिष्टवाचक 'अयं' शब्दस्य च एकस्मिन् देवदत्तपिण्डे वृत्तिः सामाना-धिकरण्यम्।

पदार्थयोः विशेषणविशेष्यभावः। यथा तत्रैव 'स' शब्दार्थतत्कालविशिष्ट 'अयं' शब्दार्थै-तत्कालविशिष्टयोः अन्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः।

'सोऽयं, अयं स' इति पदयोः अर्थयोः वा अविरुद्धवाक्यार्थेन सह लक्ष्यलक्षणभावः। यथा तत्रैव सोऽयम् इत्यादि वाक्ये सशब्दायंशब्दयोः तदर्थयोः वा अविरुद्धदेवदत्तपिण्डेन वाक्यार्थेन सह लक्ष्यलक्षणभावः।

तथा तत्त्वमस्यादिवाक्ये तत्त्वम्पदयोः परोक्षापरोक्षत्वविशिष्टेश्वरजीववाचकयोः अखण्डचैतन्ये तात्पर्येण वृत्तिः सामानाधिकरण्यम्। तथा तत्त्वं पदार्थयोः ईश्वरजीवयोः अन्योन्यभेदव्यावर्त-कतया तत् त्वम् असि, त्वं तत् असि इति विशेषणविशेष्यभावः। तथा तत्त्वम्पदयोः, तदर्थयोः वा वाक्यार्थेन अविरुद्धाखण्डचैतन्येन विरुद्धांशपरित्यागेन पक्ष्यलक्षणभावः।

तदुक्तम् – (नै.सि. 3.3)
सामानाधिकरण्यं च विशेषणविशेष्यता। लक्ष्यलक्षणभावश्च पदार्थप्रत्यगात्मनाम्॥ इति।

अस्य अर्थस्तु उक्त एव। एतदभिप्रायेण वाक्यवृत्तौ (42) अपि उक्तम् -
तत्त्वमस्यादि वाक्यं च तादात्म्यप्रतिपादने। लक्ष्यौ तत्त्वं पदार्थौ द्वौ उपादाय प्रवर्तत॥ इति।

तादात्म्यप्रतिपादने, अखण्डस्वरूपप्रतिपादन इत्यर्थः। संसर्गस्य वा विशिष्टस्य वा विशिष्टैक्य-स्य वा प्रत्यक्षादिविरुद्धत्वेन तत्त्वमस्यादिवाक्यप्रतिपाद्यत्वायोगात्।

अखण्डत्वं नाम विजातीयसजातीयस्वगतभेदशून्यत्वम्। सर्वस्य प्रपञ्चस्य ब्रह्मव्यतिरिक्तस्य कल्पितत्वेन मिथ्यात्वात् विजातीयभेदशून्यता। जीवपरमात्मनोः अत्यन्तैक्यात् सजातीयभेद-शून्यता। एकरसत्वात् स्वगतभेदशून्यता।

अथवा, त्रिविधपरिच्छेदशून्यत्वम् अखण्डत्वम्। विभुत्वात्, देशपरिच्छेदशून्यत्वम्। नित्य-त्वात्, कालपरिच्छेदशून्यत्वम्। सर्वात्मकत्वात्, वस्तुपरिच्छेदशून्यत्वम्। 'वेदाहमेतमजरं पुराणं सर्वात्मानं सर्वगतं विभुत्वात्'। (श्वे.उप. 3.21) इत्यादि श्रुतेः।

यद्वा, अपर्यायानेकशब्दप्रकाश्यत्वे सति अविशिष्टत्वम् अखण्डत्वम्। तदुक्तम् – (वेदान्त-कल्पतरु, पृ. 93)
अविशिष्टमपर्यायानेकशब्द प्रकाशितम्। एकं वेदान्तनिष्णाता अखण्डं प्रतिपेदिरे॥ इति॥

एवं तत्त्वमस्यादिवाक्यजन्याखण्डापरोक्षज्ञानात् अज्ञाननिवृत्तिः आनन्दावाप्तिश्च।

तदुक्तम् – (पञ्चदशी 7.76-78)

प्रत्यग्बोधो य आभाति सोऽद्वयानन्दलक्षणः। अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः॥

इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत्। अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि॥

तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु। पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते॥ इति।

अन्योन्यतादात्म्यप्रतिपत्तिः, 'अहं ब्रह्मास्मि' इति, 'ब्रह्मैवाहमस्मि' इति अखण्डाकारवृत्तिः। तया वृत्त्या अज्ञाने निवृत्ते, अब्रह्मत्वपरोक्षत्वादीनां निवृत्तत्वात् प्रत्यगात्मनः अखण्डानन्दस्वरूपावस्थितिः भवतीति श्लोकार्थः॥

॥ इति प्रथमः परिच्छेदः॥

॥ द्वितीयः परिच्छेदः॥

वृत्तिर्नाम विषयचैतन्याभिव्यञ्जकान्तःकरणाज्ञानयोः परिणामविशेषः। अभिव्यञ्जकत्वं नाम अपरोक्षव्यवहारजनकत्वम्, आवरणनिवर्तकत्वं वा।

परिणामो नाम उपादानसमसत्ताकोऽन्यथाभावः, उपादानविषमसत्ताकः अन्यथाभावो विवर्त इति भेदात् अनयोः परिणामविवर्तयोः। वृत्तिः उपादानान्तःकरणाज्ञानापेक्षया परिणामः चैतन्यापेक्षया विवर्त इति न सिद्धान्तविरोधः। 'तन्मनोऽकुरुत' (बृ.उप. 1.2.1) इत्यादि श्रुत्या अन्तःकरणस्य कार्यद्रव्यत्वेन सावयवतया परिणामित्वोपपत्तिः।

सा च वृत्तिर्द्विविधा। प्रमाऽप्रमाभेदात्। अत्र बोधेद्धा वृत्तिः वृत्तीद्धबोधो वा प्रमा। सा च द्विविधा। ईश्वराश्रया जीवाश्रया चेति। तत्र ईक्षणापरपर्यायस्रष्टव्यविषयाकारमायावृत्तिप्रतिबिम्बिता चित् ईश्वराश्रया। 'तदैक्षत बहु स्यां प्रजायेय' (छां.उप. 6.2.3) इत्यादि श्रुतेः।

अनधिगताबधितविषयाकारान्तःकरणवृत्तिप्रतिबिम्बिता चिद्वितीया। ब्रह्मात्मैक्यप्रमायाः तथात्वान्न असम्भवः। प्रपञ्चस्य संसारदशायाम् अबाधितत्वात् तत्प्रमायां न अव्याप्तिः। शुक्तिरजतादेः ज्ञातसत्ताकत्वेन अज्ञातसत्ताक्स्य अभावात् न अतिव्याप्तिः। तत्करणं प्रमाणम्।

सा जीवाश्रया प्रमा द्विविधा।पारमार्थिकी, व्यावहारिकी चेति। तत्र तत्त्वमस्यादिवाक्यजन्या प्रमा पारमार्थिकी। सा च निरूपिता, अग्रेऽपि निरुपयिष्यते।

प्रपञ्चप्रमा व्यावहारिकी। सा षड्विधा। प्रत्यक्ष, अनुमिति, उपमिति, शाब्द, अर्थापत्ति, अभाव, प्रमाभेदात्।

तत्र विषयचैतन्याभिन्नं प्रमाणचैतन्यं युगपत् एकदेशावस्थाने तदुपहितचैतन्ययोः अपि अभेदो भवति। तथाहि, तडागोदकं छिद्रात् निर्गत्य कुल्यद्वारा केदारं प्रविश्य चतुष्कोणाद्याकारेण यथा परिणमते तथा इन्द्रियार्थसन्निकर्षानन्तरं अन्तःकरणं चक्षुरादिद्वारा विषयदेशं गत्वा तेन संयुज्यते, पश्चात् तदाकारेण परिणमते। सोऽयं परिणामो वृत्तिः।

तस्यां वृत्तौ विषयचैतन्यं प्रतिफलति। तदा वृत्तिविषययोः युगपत् एकदेशस्थत्वेन तदुपहित-चैतन्यभेदापरयोजकत्वात् प्रमाणचैतन्यं विषयचैतन्याभिन्नं भवति। सेयं प्रत्यक्षप्रमा। तत्र वृत्त्या आवरणं निवर्तते, चैतन्येन अज्ञानम्। प्रमया वा सावरणमज्ञानं निवर्तते। ततो विषयः स्फुरति साक्षिणा। अन्तःकरणोपहितचैतन्यं साक्षी।

सेयं प्रत्यक्षप्रमा द्विविधा। बाह्यप्रमा, आन्तरप्रमा चेति। तत्र बाह्यप्रमा शब्द, स्पर्श, रूप, रस, गन्धविषयभेदात् पञ्चधा। तत्करणानि श्रोत्रादीनि ज्ञानेन्द्रियाणि पञ्च। आन्तरप्रमा द्विविधा। आत्मगोचरा, सुखादिगोचरा चेति। आत्मगोचरा द्विविधा। विशिष्टात्मविषया, शुद्धात्मविषया चेति। 'अहं जीव' इत्यादि विशिष्टात्मविषया। 'अहं ब्रह्मास्मि' इति शुद्धात्मविषया। 'मयि सुखम्' इत्यादि सुखादिविषया।

अन्तरिन्द्रियं मन आन्तरप्रमाकरणमिति वाचस्पतिमिश्राः।

आचार्यास्त्वेवं वर्णयन्ति -
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। (कठ.उप. 1.3.10)
इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।। (भ.गी. 3.42)

इति श्रुतिस्मृतिभ्यां मनस इन्द्रियेभ्यः पृथक्करणात् मनः न इन्द्रियं, वृत्तिं प्रति उपादानत्वात् न करणं मनः। सुखादिसाक्षात्कारस्य प्रमाणाजन्यत्वेन अप्रमात्वम् इष्टमेव। अत एव अन्तः-करणतद्धर्माणां शुक्तिरजतादिवत् प्रातीतिकत्वम्।

शुद्धात्मसाक्षात्कारस्य वेदान्तवाक्यजन्यत्वात् प्रमात्वम्। वाक्यस्यापि अपरोक्षज्ञानजनकत्वं वक्ष्यते। इति प्रत्यक्षप्रमाणम्।

लिङ्गज्ञानजन्यज्ञानम् अनुमितिः। सा द्विधा। स्वार्थानुमितिः, परार्थानुमितिश्च इति। व्याप्याश्र-यो लिङ्गम्। साधनसाध्ययोः नियतसामानाधिकरण्यं व्याप्तिः। प्रतिबन्धकाभावे सति सहचार-दर्शनेन सा गृह्यते। तस्यां गृहीतायां लिङ्गज्ञानेन व्याप्त्यनुभवजन्यसंस्कारोद्बोधे सति अनुमितिः जायते। इयं स्वार्थानुमितिः।

परार्थानुमितिस्तु न्यायसाध्या। न्यायः अवयवसमुदायः। अवयवाः त्रयः। प्रतिज्ञा, हेतु, उदा-हरणरूपाः। उदाहरण, उपनय, निगमनरूपा वा। तथा हि, 'जीवः परस्मात् न भिद्यते, सच्चि-दानन्दलक्षणत्वात्, परमात्मवत्' इत्यत्र जीवः परस्मात् न भिद्यत इति प्रतिज्ञा। सच्चिदा-नन्दलक्षणत्वं हेतुः। इदमेव लिङ्गमित्युच्यते। यः सच्चिदानन्दलक्षणः सः परस्मात् न भिद्यते यथा परमात्मा इति उदाहरणम्।

'अहमस्मि' इति, 'भामि' इति, 'कदापि अप्रियो न भवामि' इति अनुभवात् जीवस्य सच्चिदा-नन्दलक्षणत्वम्। अतो न हेत्वसिद्धिः।

'सत्यं ज्ञानम् अनन्तं ब्रह्म', (तै.उप. 2.1.1) 'आनन्दो ब्रह्मेति व्यजानात्' (तै.उप. 3.6.1) इत्यादिश्रुत्या ब्रह्मणः सच्चिदानन्दलक्षणत्वम्। अतो न दृष्टान्तासिद्धिः।

एवं गुरुमुखात् श्रुतवेदान्तस्य शोधित त्वं पदार्थस्य स्वस्मिन् सच्चिदानन्दलक्षणदर्शनात् 'अहं ब्रह्म' इति ब्रह्माभिन्नानुमितिः उत्पद्यते।

नच औपनिषदस्य ब्रह्मात्मैक्यस्य अनुमानगम्यत्वानुपपत्तिः मन्तव्य इति मननविधानात्। वेदान्तसहकारित्वेन अनुमानप्रामाण्यस्वीकारात्।

परार्थानुमितिस्तु न्यायोपदेशेन उत्पद्यते। न्यायो दर्शितः।

एवं ब्रह्मव्यतिरिक्तस्य प्रपञ्चस्य मिथ्यात्वसाध्यानुमितिः दृश्यत्वादिहेतुभिः उत्पद्यते। मिथ्यात्वं नाम अनिर्वचनीयत्वम्। दृश्यत्वं नाम चैतन्यविषयत्वम्। अतो ब्रह्मणि न व्यभिचारः।

तच्च अनुमानम् अन्वयिरूपम् एकमेव, न तु केवलान्वयि। अस्मन्मते ब्रह्मव्यतिरिक्तस्य सर्वस्य प्रपञ्चस्य ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेन तदप्रतियोगित्वरूपकेवलान्वयित्वस्य अप्रसिद्धेः। नापि केवलव्यतिरेकि। साधनेन साध्यानुमितौ साध्याभावसाधनाभावव्याप्तिज्ञानस्य अनुपयोगात्। अन्वयव्याप्तिम् अविदुषः साध्यप्रमा अर्थापत्तिप्रमाणात् इति वक्ष्यते। इत्यनुमानम्।

सादृश्यप्रमितिः उपमितिः।

वाक्यकरणिका प्रमा शाब्दी। आकाङ्क्षायोग्यतासन्निधिमत्पदसमुदायः वाक्यम्। अन्वयानुपपत्तिः आकाङ्क्षा। वाक्यार्थाबाधो योग्यता। अविलम्बेन उच्चारणं सन्निधिः। अव्युत्पन्नस्य सङ्गतिग्रहाभावात् न वाक्यार्थप्रमा।

पदपदार्थयोः स्मार्यस्मारकभावः सङ्गतिः। सा द्विविधा। शक्तिः, लक्षणा चेति।

शक्तिः नाम मुख्या वृत्तिः। पदपदार्थयोः वाच्यवाचकभावः सम्बन्ध इति यावत्। सा च द्विविधा। योगो रूढश्चेति। अवयवशक्तिः योगो यथा पाचकादिपदानाम्। रूढिः समुदायशक्तिः यथा घटादिपदानाम्।

सा च व्यवहारादिना गृह्यते। तथाहि, उत्तमवृद्धस्य 'घटमानय' इति वाक्यश्रवणानन्तरं मध्यमवृद्धः प्रवर्तते। बालः, प्रवृत्तिं दृष्ट्वा, ज्ञानम् अनुमिनोति। तथा हि, इयं प्रवृत्तिः ज्ञानसाध्या, प्रवृत्तित्वात्, मदीयप्रवृत्तिवत् इति ज्ञानम् अनुमाय तस्य वाक्यजन्यत्वम् अनुमिनोति। इदं ज्ञानं एतद्वाक्यजन्यम् एतद्वाक्यान्वयव्यतिरेकानुविधायित्वात् दण्डजन्यघटादिवत् इति। अनन्तरम् आवापोद्वापाभ्यां घटपदस्य घटव्यक्तौ शक्तिं अवधारयति।

सा च शक्तिः पदार्थ इति नैयायिकाः। कार्यान्वित इति मीमांसकाः। अन्वित इति वेदान्तिनः। एवं व्याकरणादिना अपि शक्तिः गृह्यते। उक्तं च –
शक्तिग्रहं व्याकरणोपमानकोश आप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धा॥ इति।

लक्षणा शक्यसम्बन्धः। सा च द्विविधा। केवललक्षणा, लक्षितलक्षणा च इति।

केवललक्षणा त्रिविधा। जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेति। शक्यार्थपरित्यागेन तत्सम्बन्ध्यर्थान्तरे वृत्तिः जहल्लक्षणा। यथा 'गङ्गायां घोष' इति। अत्र गङ्गापदस्य स्वार्थपरित्यागेन तत्सम्बन्ध्यर्थान्तरे तीरे लक्षणा। शक्यार्थापरित्यागेन तत्सम्बन्ध्यर्थान्तरे वृत्तिः अजहल्लक्षणा। यथा 'शोणो धावति' इति। अत्र शोणशब्दस्य शोणगुणविशिष्टाश्वादिद्रव्ये। शक्यैकदेशपरित्यागेन एकदेशे वृत्तिः जहदजहल्लक्षणा। इयमेव भागलक्षणा इति उच्यते। यथा 'सोऽयं देवदत्त' इत्यत्र सोऽयमिति केवलदेवदत्तपिण्डे, यथा वा 'तत्त्वमसि' इत्यत्र तत्त्वम्पदयोः अखण्डचैतन्ये।

शक्यपरम्परासम्बन्धः लक्षितलक्षणा। यथा द्विरेफस्य मधुकरे। गौणी अपि लक्षितलक्षणैव।

एवं व्युत्पन्नस्य गृहीतसङ्गतिकवाक्यात् वाक्यार्थप्रमोत्पत्तौ आकाङ्क्षायोग्यताऽऽसत्तिस्तात्पर्यज्ञानं

च इति चत्वारि कारणानि। आकाङ्क्षा योग्यते निरूपिते।

शक्तिलक्षणा अन्यतरसम्बन्धेन अव्यवधानेन पदजन्यपदार्थोपस्थितिः आसत्तिः।

तात्पर्यं द्विविधम्। वक्तृतात्पर्यं, शब्दतात्पर्यं च इति। पुरुषाभिप्रायो वक्तृतात्पर्यम्। तज्ज्ञानं वाक्यार्थज्ञाने न कारणम्। तदभावेऽपि अव्युत्पन्नस्य वाक्यात् वाक्यार्थज्ञानदर्शनात्।

तदितरप्रतीतिमात्रेच्छया अनुचरितत्वे सति तदर्थप्रतीतिजननयोग्यत्वं शब्दतात्पर्यम्। तच्च षड्विधैः लिङ्गैः निश्चीयते वेदे। लिङ्गानि तु दर्शितानि (वाक्यवृत्तिः, पु. 31)-
उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्तौ च लिङ्गं तात्पर्यनिर्णय॥ इति।

अस्यार्थः - प्रकरणप्रतिपाद्यस्य अद्वितीयवस्तुनः आद्यन्तयोः प्रतिपादनम् उपक्रमोपसंहारौ। यथा छान्दोग्ये षष्ठे 'सदेव सौम्येदमग्र आसीत्, एकमेवाद्वितीयम्', (2.1) 'ऐतदात्म्यमिदं सर्वम्' (8.7) इति उपक्रमोपसंहारौ आद्यन्तयोः।

प्रकरणप्रतिपाद्यस्य पुनः पुनः प्रतिपादनम् अभ्यासः। यथा तत्रैव 'तत्त्वमसि' इति नवकृत्वोऽभ्यासः।

प्रकरणप्रतिपाद्यस्य मानान्तराविषयता अपूर्वता। यथा तत्रैव अद्वितीयवस्तुनो मानान्तराविषयता।

प्रकरणप्रतिपाद्यस्य श्रूयमाणं तज्ज्ञानप्रयोजनं फलम्। यथा तत्रैव 'आचार्यवान् पुरुषो वेद', 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्य' (छां.उप 6.14.2) इति अद्वितीयवस्तुज्ञानात् तत्प्राप्तिः फलम्।

प्रकरणप्रतिपाद्यस्य प्रशंसनम् अर्थवादः। यथा तत्रैव 'येनाऽश्रुतं श्रुतं भवति। अमतं मतम्-विज्ञातं विज्ञातम्' (छां.उप 6.1.3) इति अद्वितीयवस्तुप्रशंसनम्।

प्रकरणप्रतिपाद्यस्य दृष्टान्तैः प्रतिपादनम् उपपत्तिः। यथा तत्रैव 'यथा सोम्येकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां.उप 6.1.4) इत्यादि वाक्यप्रतिपादितमृदादिदृष्टान्तैः अद्वितीयवस्तुप्रतिपादनम्।

एवं षड्विधतात्पर्यलिङ्गैः वेदान्तानाम् अद्वितीये ब्रह्मणि तात्पर्यनिश्चयः। इदमेव श्रवणम् इत्युच्यते।

श्रुतस्य अर्थस्य उपपत्तिभिः चिन्तनं मननम्। विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणं निदिध्यासनम्। तदुक्तम् – (सं.शा. 3.344-345)
शब्दशक्तिविषयं निरूपणं युक्तितः श्रवणमुच्यते बुधैः।
वस्तुतत्त्वविषयं निरूपणं युक्तितो मननमित्युदीर्यते॥

चेतसस्तु चितिमात्रशेषता ध्यानमित्यभिवदन्ति वैदिकाः।
अन्तरङ्गमिदमित्युदीरितं तत्कुरुष्व परमात्मबुद्धये॥ इति।

इदं श्रवणादित्रयं साधनसम्पन्नस्य सन्न्यासिनो ज्ञानं प्रति अन्तरङ्गसाधनम्। 'आत्मा वा अरे द्रष्टव्यः, श्रोतव्यो मन्तव्यो निदिध्यासितव्य' (बृ.उप. 2.4.5) इत्यादिश्रुतेः।

साधनानि चत्वारि। नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमदमादिसम्पत्, मुमुक्षुत्वं च इत्येवं रूपाणि। 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्॥', (मु.उप. 1.2.12)

‘कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुः अमृतत्वमिच्छन्’, ‘शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा आत्मन्येवात्मानं पश्येत्’ (बृ.उप. 4.4.23) इत्यादि श्रुतिभ्यः यथोक्तसाधन-सम्पन्नस्य सन्न्यासाधिकारः।

विहितानां कर्मणां विधिना परित्यागः सन्न्यासः। स च वैराग्यहेतुकः। ‘यदहरेव विरजेत्तदहरेव प्रव्रजेत्’ (जा.उप. 4) इत्यादिश्रुतेः। ‘वैराग्यं परमेतस्य मोक्षस्य परमोऽवधिः’ (महाभारत, शां.प. 3.20.27) इति स्मृतेश्च।

स च वैराग्यतारतम्येन चतुर्विधः। कुटीचक, बहूदक, हंस, परमहंसभेदात्। वैराग्यं द्विविधं। अपरं, परं चेति। तत्रापरं चतुर्विधम्। यतमानव्यतिरेकैकेन्द्रियत्ववशीकारभेदात्।

‘अस्मिन् संसारे इदं सारमिदमसारम्’ इति सारासारविवेको यतमानवैराग्यम्।

चित्तगतदोषाणां मध्ये एतावन्तः पक्का एतावन्तः अपक्का इति विविच्य अपक्कदोषनिरोधयत्नः व्यतिरेकवैराग्यम्।

विषयेच्छासत्त्वेऽपि मनसि इन्द्रियनिरोधावस्थानम् एकेन्द्रियत्वं वैराग्यम्।

वशीकारवैराग्यम् ऐहिकामुष्मिकविषयजिहासा। तदुक्तम् – ‘दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्’ (यो.सू. 1.15) इति। तत् त्रिविधम्। मन्दं, तीव्रं, तीव्रतरं चेति। पुत्र-दारादिवियोगे ‘धिक्संसारम्’ इति बुद्ध्या विषयजिहासा मन्दवैराग्यम्। ‘अस्मिन् जन्मनि पुत्रदारादि मास्तु’ इति स्थिरबुद्ध्या विषयजिहासा तीव्रम्। ‘पुनरावृत्तिसहितब्रह्मलोकादिपर्यन्तं मास्तु’ इति स्थिरबुद्ध्या विषयजिहासा तीव्रतरम्।

तत्र मन्दवैराग्ये सन्न्यासाधिकार एव नास्ति।

यदा मनसि वैराग्यं जायते सर्ववस्तुषु। तदैव सन्न्यसेद्विद्वान् अन्यथा पतितो भवेत्॥ इति स्मरणात्।

तीव्रवैराग्ये सति यात्राद्यशक्तौ, कुटीचकसन्न्यासाधिकारः। तच्छक्तौ, बहूदकसन्न्यासाधिकारः। तीव्रवैराग्ये सति हंससन्न्यासाधिकारः। एते त्रयः सन्न्यासा एतेषामाचाराः च स्मृतौ प्रसिद्धाः।

तीव्रतरवैराग्ये मुमुक्षोः परमहंससन्न्यासाधिकारः। स च परमहंसो द्विविधः। विविदिषा-सन्न्यासो, विद्वत्सन्न्यासश्चेति।

साधनसम्पन्नेन तत्त्वज्ञानमुद्दिश्य क्रियमाणः सन्न्यासः विविदिषासन्न्यासः। ‘एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति’ (बृ.उप. 4.4.22) इत्यादि श्रुतिः तत्र प्रमाणम्। स च द्विविधः। जन्मापादककर्मत्यागात्मकः, प्रैषोच्चारणपूर्वकदण्डधारणादि आश्रमरूपः च इति।

‘न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः’ (महा.ना.उप. 12-14) इत्यादिश्रुतेः आद्ये मानम्। विरक्तस्य गृहस्थादेः प्रबलनिमित्तवशेन सन्न्यासप्रतिबन्धे आद्यसन्न्यासे अधि-कारः। अत्र स्त्रीणामपि अधिकारः। जनकादीनां मैत्रेयीप्रभृतीनां च तत्त्वविदां श्रुतिस्मृतीति-हासपुराणेषु उपलम्भात्।

द्वितीये ‘दण्डमाच्छादनं कौपीनं च परिग्रहेत्, शेषं विसृजेत्’ (आरु.उप. 1), ‘संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया। प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिता॥’ इत्यादि (ना.परि.उप. 3.15) वचनानि प्रमाणानि।

गृहस्थाश्रमादौ कृतश्रवणादिभिः उत्पन्नब्रह्मसाक्षात्कारेण गृहस्थादिना विक्षिप्तचित्तस्य चित्त-विश्रान्तिलक्षणजीवन्मुक्तिमुद्दिश्य क्रियमाणः सन्न्यासः विद्वत्सन्न्यासः। तत्र 'एतमेव विदित्वा मुनिर्भवति' (बृ.उप. 4.4.22), 'अथ योगिनां परमहंसानाम्' इत्यादि (परमहंसोपनिषत् 1), 'यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम्। तदैकदण्डं सङ्गृह्य सोपवीतां शिखां त्यजेत्॥ '(ना.पारि.उप. 3.17) इत्यादि श्रुतिस्मृतिवचनानि प्रमाणानि।

तत्राद्यसन्न्यासः जन्मान्तरीयेऽपि ज्ञाने उपकरोति। जनकादीनां तत्त्वज्ञानोपलम्भात् श्रुत्यादिषु 'यद्यातुरः स्यान्मनसा वाचा वा सन्न्यसेत्' (जा.उप. 5) इति आतुरसन्न्यासविधानात् च।

आतुरेऽपि विरक्तस्यैवाधिकारात् न सन्न्यासान्तरम्। अन्यथा प्रकरणविरोधप्रसङ्गात्। तदुक्तम् – (सं.शा 3.362) -
जन्मान्तरेषु यदि साधनजातमासीत् सन्न्यासपूर्वकमिदं श्रवणादिकं च।
विद्यामवाप्स्यति जनः सकलोऽपि यत्र तत्राश्रमादिषु वसन्न निवारयाम॥ इति।

तदेवं पूर्वोक्ताधिकारिणः श्रवणादीनां तत्त्वज्ञानकारणत्वम् अन्वयव्यतिरेकाभ्यां निश्चीयते।

अर्हार्थे 'श्रोतव्य' इत्यादिषु तव्यप्रत्यय इति वाचस्पतिमिश्राः।

आचर्यस्तु एवं वर्णयन्ति – 'यथोक्ताधिकारिणः, द्रष्टव्यः श्रोतव्य इत्यादि वाक्यैः दर्शनमुद्दिश्य मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणं नाम अङ्गि विधीयत' इति।

तस्य च दृष्टफलत्वात् न अपूर्वविधिः। अप्राप्तार्थविधायको हि अपूर्वविधिः। किन्तु नियमविधिः वा परिसङ्ख्याविधिः वा।

पक्षप्राप्तस्य अप्राप्तांशपूरकः विधिः नियमविधिः। यथा 'व्रीहीनवहन्यात्' इति अवघातविधिः।

उभयप्राप्तौ इतरव्यावृत्तिबोधको विधिः परिसङ्ख्याविधिः। यथा 'इमामगृभ्णन् रशनामृतस्येत्य-श्वाभिधानीमादत्त' इति गर्दभरशनाग्रहणव्यावृत्तिविधिः। एवं प्रकृते जिज्ञासुः 'वेदान्तश्रवणमेव कुर्यात्' इति नियमविधिः 'वेदान्तश्रवणव्यतिरिक्तं न कुर्यात्' इति परिसङ्ख्याविधिः वा। तदुक्तम् – (नैष्क.सि. 1.88) –
नियमः परिसङ्ख्या वा विध्यर्थो हि भवेद्यतः। अनात्माऽदर्शनेनैव परात्मानमुपास्महे॥ इति

तच्च श्रवणं सन्न्यासिनां नित्यम् -
नित्यं कर्म परित्यज्य वेदान्तश्रवणं विना। वर्तमानस्तु सन्न्यासी पतत्येव न संशय॥ इति अकरणप्रत्यवायश्रवणात्।

'आसुप्तेरामृतेः कालं नयेत् वेदान्तचिन्तया' इति स्मृत्या 'यावज्जीवमग्निहोत्रं जुहुयात्' इत्यादि श्रुत्या जीवनं निमित्तीकृत्य अग्निहोत्रादिविधानवत् जीवनं निमित्तीकृत्य श्रवणविधानात्।

त्वं पदार्थविवेकाय सन्न्यासः सर्वकर्मणाम्। श्रुत्या विधीयते यस्मात् तत्त्यागी पतितो भवेत्॥

कारकस्य करणेन तत्क्षणाद्भिक्षुरेव पतितो यथा भवेत्।
व्यञ्जकस्य परिवर्जनादसौ सद्य एव पतितो न संशयः॥
इति वार्तिकाचार्य (बृ.भा.वा. 4.4.1228) – (सङ्क्षेपशारीरक 3.332) - आचार्याभ्यां श्रवणा-दिरहितस्य सन्न्यासिनः पातित्याभिधानात् च।

गृहस्थादीनां श्रवणादि काम्यम् -
दिने दिने तु वेदान्तश्रवणाद्भक्तिसंयुतात्। गुरुशुश्रूषया लब्धात्कृच्छ्राशीति फलं लभेत्॥

अन्ये तु वेदान्तश्रवणे साधनचतुष्टयसम्पन्नस्यैव अधिकारात् गृहस्थादेः श्रवण अधिकार एव नास्ति, श्रुतिषु याज्ञवल्क्यजनकादीनां तत्त्वज्ञानप्रतिपादकोपाख्यानस्य ब्रह्मात्मनि तात्पर्यात् स्वार्थे तात्पर्यमेव नास्ति इति आहुः। तदसत्। याज्ञवल्क्यप्रभृतीनां गृहस्थस्य तुलाधारस्य च ज्ञानित्वश्रवणात्।

परं वैराग्यं गुणवैतृष्ण्यम्। गुणेषु जिहासेति यावत्। तदुक्तं 'तत् परं पुरुषख्यातेर्गुणवैतृष्ण्यम्' (यो.सू. 1.16) इति। तच्च असम्प्रज्ञातसमाधेः अन्तरङ्गसाधनम्। उक्तं च 'तीव्रसंवेगानामासन्नः समाधिलाभः' (व्यासभाष्यम्, यो.सू. 1.21) इति। अलम् अतिप्रसङ्गेन।

एवं कर्मवाक्यानामपि उपक्रमादिभिः तात्पर्यनिर्णयः। प्रकरणादिना लौकिकवाक्यानां तात्पर्यनिर्णयः।

एतादृश तात्पर्यानुपपत्तिः पूर्वोक्तलक्षणा बीजं, न तु अन्वयानुपपत्तिः। तस्याः 'यष्टीः प्रवेश्य' इत्यादौ असम्भवात्। 'गङ्गायां घोष' इत्यादौ तात्पर्यानुपपत्तेः सम्भवात्।

न केवलं लक्षणा पदमात्रवृत्तिः, किन्तु वाक्यवृत्तिः अपि। 'गभीरायां नद्यां घोष' इत्यादौ पदसमुदायात्मकवाक्यस्य तीरे लक्षणा स्वीकारात्। अत एव अर्थवादवाक्यानां प्राशस्त्ये लक्षणा। अन्यथा पदान्तरवैयर्थ्यं स्यात्। अत एव प्राशस्त्यपदार्थप्रत्यायकत्वेन अर्थवादवाक्यानां पदस्थानीयतया पदैकवाक्यत्वम्। स्वार्थे तात्पर्यवतां 'समिधो यजति' (तै.सं. 2.6.1.1), 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादिवाक्यानाम् उपकार्योपकारकाकङ्क्षायाम् एकवाक्यत्वं वाक्यैकवाक्यत्वम्।

एवञ्च अवान्तरवाक्यार्थज्ञानमपि महावाक्यार्थज्ञाने कारणम्। तथा अन्वयव्यतिरेकानुविधानात्।

एवं यथोक्तसहकारिसम्पन्नं वाक्यं परोक्षापरोक्षभेदेन द्विविधां प्रमाम् उत्पादयति।

तत्र परोक्षार्थप्रतिपादकं वाक्यं परोक्षप्रमोत्पादकम्। यथा 'स्वर्गकामो यजेत', 'सदेव सोम्येदमग्र आसीत्' (छां.उप. 6.2.1), 'दशमोऽस्ति' इत्यादि वाक्यम्। परोक्षत्वं नाम अनावृतसंवित्तादात्म्याभावो योग्यस्य विषयस्य। धर्माधर्मयोः अयोग्यत्वात् न प्रत्यक्षत्वम्।

अपरोक्षार्थप्रतिपादकं वाक्यम् अपरोक्षप्रमोत्पादकम् यथा 'दशमस्त्वमसि', 'तत्त्वमसि' इत्यादि वाक्यम्। अपरोक्षत्वं नाम अनावृतसंवित्तादात्म्यम्। अनावृतसंवित् साक्षिचैतन्यम्। अन्तःकरण उपहितचैतन्यं साक्षी। तस्य आवृतत्वे जगदान्ध्यप्रसङ्गः। तत्तादात्म्यं नाम तद्भिन्नत्वे सति तदभिन्नसत्ताकत्वम्। तथा च 'दशमस्त्वमसि' इत्यत्र दशमस्य त्वम्पदार्थाभिन्नतया अपरोक्षत्वेन वाक्यात् दशमापरोक्षप्रमैव जायते 'दशमोऽस्मि' इति, न तु वाक्यात् परोक्षज्ञानं मनसा तत्साक्षात्कारः। मनसः अनिन्द्रियत्वस्य उक्तत्वात्, वृत्तिं प्रति उपादानत्वेन करणत्वायोगाच्च, प्रमाणजन्यापरोक्षज्ञानस्यैव भ्रमनिवर्तकत्वात् च।

एवं 'तत्त्वमसि' इत्यत्रापि तत्पदलक्ष्यस्य ब्रह्मणः त्वं पदलक्ष्यसाक्ष्यभिन्नतया अनावृतसंवित्तादात्म्यात् नित्यापरोक्षत्वेन शोधितत्वम्पदार्थस्य अधिकारिणो मननिदिध्यासनसंस्कृतान्तःकरणसहकृतविचारिततत्त्वमस्यादिवाक्यात् 'अहं ब्रह्मास्मि' इति अपरोक्षप्रमा जायते। एवं च सति 'सर्वे वेदा यत्पदमामनन्ति' (कठ.उप. 1.2.15), 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ.उप. 3.9.26), 'नावेदविन्मनुते तं बृहन्तं' (तै.ब्राह्मण 3.12.9.7) इत्यादि श्रुतयः सामञ्जस्येन उपपद्यन्ते। 'मनसैवानुद्रष्टव्यम्' (बृ.उप. 4.4.19) इत्यादि श्रुतिस्तु मनसो वाक्यसहकारित्वप्रतिपादनपरा। अन्यथा यन्मनसा न मनुते' (केन उप. 1.5) इत्यादि श्रुतिविरोध-प्रसङ्गात्। एवं शाब्दी प्रमा निरूपिता।

अनुपपद्यमानार्थदर्शनात् तदुपपादक भूतार्थान्तरकल्पनम् अर्थापत्तिः प्रमा। यथा दिवा अभुञ्जानस्य देवदत्तस्य रात्रिभोजनं विना अनुपपद्यमानपीनत्वज्ञानात् तदुपपादकरात्रिभोजनकल्पनम्। तत्र अनुपपद्यमानपीनत्वज्ञानं करणम्। रात्रिभोजनकल्पनं फलम्। सा च अर्थापत्तिः द्विविधा। दृष्टार्थापत्तिः, श्रुतार्थापत्तिः च इति।

दृष्टार्थापत्तिः यथा 'शुक्तौ इदं रजतम्' इति अनुभूयमानस्य रजतस्य 'नेदं रजतम्' इति बाध्यत्वं दृष्टम्। तस्य मिथ्यात्वमन्तरेण सत्यत्वे अनुपपन्नं सत् मिथ्यात्वं कल्पयति 'न इदं रजतम्' इति ज्ञानम्। इदं रजतं सत्यं वा असत्यं वा इति (न आशङ्कनीयम्)। तस्य असत्वे पुरोवर्तिनि प्रवृत्त्यभावप्रसङ्गात्। तदर्थज्ञानस्य प्रत्यक्षत्वाभावप्रसङ्गात् (च)। सत्वे बाधाभावप्रसङ्गात्। देशान्तरसत्वे रजतेन्द्रियसन्निकर्षाभावेन प्रत्यक्षाभावप्रसङ्गात्। 'रजतं साक्षात्करोमि' इति अनुभवस्य सर्वानुभवसिद्धत्वात्। तस्मात् भ्रमकाले शुक्तिकाशकले रजतम् उत्पद्यत इति अङ्गीकर्तव्यम्। रजतोत्पादकलौकिकसामग्र्यभावेऽपि पुरोवर्तीन्द्रियसन्निकर्षानन्तरम् इदम् आकरवृत्तौ सत्याम् इदमवच्छिन्नचैतन्यनिष्ठा शुक्तित्वप्रकारकाविद्या सादृश्यदर्शनसमुद्बुद्धसंस्कारसहकृता रजताकारेण तज्ज्ञानाकारेण च परिणमते। तस्य च मायाकार्यत्वात् मिथ्यात्वम्। एवं दृष्टार्थापत्तिः निरूपिता।

श्रुतार्थापत्तिः यथा 'तरति शोकमात्मवित्' (छा.उप. 7.1.3) इति शोकोपलक्षितप्रमातृत्वादिबन्धस्य ज्ञाननिवर्त्यत्वं श्रुतम्। तस्य मिथ्यात्वमन्तरेण सत्यत्वे अनुपपन्नं सत् मिथ्यात्वम् कल्पयति। सेयं श्रुतार्थापत्तिः।

अन्तःकरणविशिष्टं चैतन्यं प्रमाता कर्ता भोक्ता च। केवलस्य आत्मनो असङ्गत्वेन प्रमातृत्वाद्यनुपपत्तेः शुक्तिरजतवत् आत्मज्ञानात् अन्तःकरणादिकं स्वरूपेण प्रत्यगात्मनि अध्यस्तम्।

अध्यासो नाम परत्र परावभासः। स च द्विविधः। ज्ञानाध्यासः, अर्थाध्यासः च इति। तत्र अतस्मिंस्तद्बुद्धिः ज्ञानाध्यासः। यथा शुक्तौ रजतबुद्धिः यथा वा आत्मनि अनात्मबुद्धिः।

प्रमाणाजन्यज्ञानविषयः पूर्वदृष्टसजातीयः अर्थाध्यासः। सोऽपि द्विविधः। प्रातीतिको व्यावहारिकश्च इति। तत्र आगन्तुकदोषजन्यः प्रातीतिकः। यथा शुक्तिरजतादिः। प्रातीतिकभिन्नो व्यावहारिकः। यथा आकाशादि घटान्तं जगत्। तथा च प्रमातृत्वादिबन्धस्य अध्यस्ततया मिथ्यात्वम् उपपद्यते।

एतदभिप्रायेण उक्तं भगवता भाष्यकारेण 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' (ब्र.सू. अध्यासभाष्यम्) इति। अस्यार्थः - स्मृतिरूपः संस्कारजन्यत्वेन स्मृतिदृशः पूर्वदृष्टावभासः पूर्वदृष्टसजातीय इति। एवं श्रुतार्थापत्तिः निरूपिता।

अभावप्रमा योग्यानुपलब्धिकरणिका। यथा घटानुपलब्ध्या घटाभावप्रमा भूतले जायते, तत्र अनुपलब्धिः एव करणं न इन्द्रियं, तस्य अधिकरणग्रहणोपक्षीणत्वात्, अभावेन समं सन्निकर्षाभावात् च।

असाधारणकारणं करणम्। नियतपूर्ववृत्ति कारणम्। तद्विविधम्। उपादानकारणं, निमित्तकारणं च इति। कार्यान्वितं कारणम् उपादानं, यथा घटादेः मृदादिः। कार्यानुकूलव्यापारवत् निमित्तम्। यथा घटादेः कुलालादिः।

ब्रह्म तु मायोपहितं सत्प्रपञ्चस्य उपाधिप्राधान्येन उपादानं, स्वप्राधान्येन निमित्तं भवति। तदैक्षत बहु स्यां प्रजायेय' (छा.उप. 6.2.3) इत्यादिश्रुतेः 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' (ब्र.सू. 1.4.23) इति सूत्रात् च।

तच्च कारणं द्विविधम्। साधारणम् असाधारणं च इति। कार्यमात्र उत्पादकं साधारणं कारणं यथा अदृष्टादि। कार्यविशेषोत्पादकम् असाधारणकारणं यथा चाक्षुषादि प्रमायां चक्षुरादि प्रमायां चक्षुरादिः। तथा च घटाद्यभावप्रमायां घटाद्यनुपलब्धिः असाधारणं कारणम्। तदेव करणम्।

'यद्यत्र घटः स्यात्' इति तर्कितेन प्रतियोगिसत्वेन 'तर्हि उपलभ्येत' इति प्रसञ्जित उपलब्धि-रूपः प्रतियोगी यस्याः सा योग्या अनुपलब्धिः तया अभावो गृह्यते।

नञर्थोल्लिखितधीविषयोऽभावः। स च अत्यन्ताभाव एक एव, भेदे प्रमाणाभावात्। तथा हि, 'सदेव सोम्येदमग्र आसीत्' (छा.उप. 6.2.1), 'सत्त्वाच्चावरस्य' (ब्र.सू. 2.1.16) इति श्रुति-सूत्राभ्यां प्रागुत्पत्तेः कार्यस्य कारणात्मना सत्त्वप्रतिपादनेन प्रागभावस्य दुर्निरूप्यत्वात्। प्रागा-त्मज्ञानात् कार्यस्य निरन्वयनाशानङ्गीकारेण ध्वंसस्यापि दुर्निरूपत्वात्। अनादिनित्यत्रैकालि-कात्यन्ताभाव एक एव।

स च द्विविधः। पारमार्थिको व्यावहारिकश्च इति। 'नेह नानास्ति किञ्चन' (बृ.उप. 4.4.19) इत्यादि श्रुतिप्रतिपादितः प्रपञ्चात्यन्ताभावः पारमार्थिकः। स च अधिष्ठानस्वरूपः। अधिष्ठाना-तिरिक्त इति केचित्।

घटात्यन्ताभावो व्यावहारिकः। अयमेव अभेदप्रतियोगिको 'भूतलं घटो न' इत्यादि प्रतीति-विषयो भेद इत्युच्यते। 'घटो नास्ति' इत्यादि विषयोऽत्यन्ताभाव इत्युच्यते वादिभिः। सर्वोऽपि अनित्य एव। सर्वस्य ब्रह्मज्ञाननिवर्त्यत्वात्।

अन्ये तु लौकिकतन्त्रान्तरबुद्धिम् अनुसरन्तः अभावभेदं स्वीचक्रुः। तथा हि प्रागभावप्रध्वंसा-भावात्यन्ताभावान्योन्याभावभेदात् चतुर्विधोऽभावः।

उत्पत्तेः प्राक् कारणे कार्याभावः प्रागभावः - यथा मृदादौ घटाद्यभावः। उत्पन्नस्य कार्यस्य कारणे अभावः प्रध्वंसाभावः - यथा मुद्गरादि प्रहरणान्तरं कपालादौ घटाद्यभावः। प्रतियोग्य-समानाधिकरणाभावः अत्यन्ताभवः – यथा भूतलादौ घटाद्यभावः। प्रतियोग्यसमानाधिकरण अभावः अन्योन्याभावः - यथा भूतलादौ घटभेदः। सर्वेऽपि अभावाः अनित्याः च इति। एवम् अभावप्रमा निरूपिता।

एवं षड्विधप्रमया सावरणम् अज्ञानं निवर्तते। तत्र परोक्षप्रमया असत्त्वापादकमौढ्याज्ञान-निवृत्तिः। अपरोक्षप्रमया असत्त्वाभानापादकाज्ञाननिवृत्तिः।

॥ इति द्वितीयः परिच्छेदः॥

तृतीयः परिच्छेदः

प्रमाभिन्नं ज्ञानम् अप्रमा। सा च द्विविधा। स्मृतिः अनुभूतिः च इति।

संस्कारमात्रजन्यं ज्ञानं स्मृतिः। सा अपि द्विविधा। यथार्थायथार्थभेदात्।

यथार्था स्मृतिः अपि द्विविधा। अनात्मस्मृतिः, आत्मस्मृतिः च इति।

तत्र व्यावहारिकप्रपञ्चो मिथ्या दृश्यत्वात्, जडत्वात्, परिच्छिन्नत्वात् शुक्ति-रूप्यवत् इति अनुमानसिद्धमिथ्यात्वानुसन्धानं यथार्थाऽऽनात्मस्मरणम्।

तत्त्वमस्यादिवाक्यार्थानुसन्धानं यथार्थाऽऽत्मस्मरणम्।

अयथार्था स्मृतिः अपि द्विविधा, पूर्ववत्। प्रपञ्चस्य सत्यत्वानुसन्धानम् अयथार्थानात्मस्मरणं मिथ्यावस्तुत्वात् तस्य। अहङ्कारादिषु आत्मत्वानुसन्धानम् आत्मनि कर्तृत्वानुसन्धानं वा अय-थार्थात्मस्मरणम्। स्वप्नस्तु अनुभव एव, न स्मृतिः इति वक्ष्यते।

स्मृतिभिन्नं ज्ञानम् अनुभूतिः। सा च द्विविधा। यथार्था, अयथार्थजा च इति। यथार्थानुभूतिः प्रमा। सा निरूपिता।

बाधितविषयानुभूतिः अयथार्था। साऽपि द्विविधा। संशयो निश्चयः च इति। एकस्मिन् धर्मिणि भासमानविरुद्धनानाकोटिकज्ञानं संशयः। एकस्मिन् धर्मिणि स्वाकारविरुद्धधर्मद्वयवैशिष्ट्याव -गाहिज्ञानाविरुद्धज्ञानं संशय इति केचित्।

स च द्विविधः। प्रमाणसंशयः, प्रमेयसंशयश्चेति।

तत्र प्रमाणगतासम्भावना प्रमाणसंशयः। यथा अनभ्यासदशायां ममोत्पन्नं जलज्ञानं प्रमाणं न इति संशयः। स च प्रामाण्यनिश्चयात् निवर्तते। प्रामाण्यनिश्चयः तु स्वत एव।

प्रामाण्यं नाम तद्वति तत्प्रकारकत्वम्। तस्य स्वतस्त्वं नाम यावत् स्वाश्रयग्राहकग्राह्यत्वम्। स्वाश्रयो वृत्तिज्ञानं, तद्ग्राहकं साक्षिचैतन्यं, तेन तन्निष्ठ-प्रामाण्यं गृह्यत इति स्वतः प्रामाण्यं।

अप्रामाण्यं परतो गृह्यते। तच्च तदभाववति तत्प्रकारकत्वम्। तदभाववत्त्वस्य वृत्तिज्ञानानुपनी-तत्वेन साक्षिणा ग्रहीतुम् अशक्यतया परत एव अप्रामाण्यं गृह्यते।

प्रामाण्यस्वतस्त्वपक्षे संशयो दोषवशात् उपपद्यते, इत्ययं प्रमाणसंशयः।

वेदान्ताः अद्वितीये ब्रह्मणि प्रमाणं न वा इति संशयः करणगता असम्भावना। सा च श्रवणेन निवर्तते। तच्च निरूपितम्। तदपि श्रवणं शारिरकप्रथमाध्यायपठनेन निष्पद्यते।

प्रमेयगता असम्भावना द्विविधा। अनात्मगता, आत्मगता चेति। स्थाणुः वा पुरुषो वा इति अनात्मसंशयः।

आत्मसंशयोऽनेकविधः। तथा हि ब्रह्म अद्वितीयं सद्वितीयं वा, अद्वितीयत्वेऽपि आनन्दगुणकं वा आनन्दस्वरूपं वा इत्यादि परमात्मगतः संशयः।

आत्मा देहात् व्यतिरिक्तो वा न वा, देहात् व्यतिरिक्तत्वेऽपि कर्ता वा अकर्ता वा, अकर्तृत्वेऽपि चिद्रूपो वा अचिद्रूपो वा, चिद्रूपत्वेऽपि आनन्दात्मको वा न वा। इत्यादि जीवगतः संशयः।

जीवस्य सच्चिदानन्दरूपत्वेऽपि परमा-त्मना सहैक्यं सम्भवति वा न वा, ऐक्येऽपि तज्ज्ञानं मोक्षसाधनं न वा, मोक्षसाधनत्वेऽपि तज्ज्ञानं कर्मसमुच्चितं मोक्षसाधनं वा केवलं ज्ञानं वा, इति ऐक्यगतसंशयः। अयं सर्वोऽपि संशयो (संशयाः) मननेन तर्कात्मकेन निवर्तते।

तर्को नाम अनिष्टप्रसङ्गः। व्याप्यारोपेण व्यापकापादनम् इति यावत्। व्याप्त्याश्रयो व्याप्यम्। व्याप्तिनिरूपकं व्यापकम्।

तथा च यदि प्रपञ्चः सत्यः स्यात् तर्हि अद्वितीयश्रुतिविरोधः स्यात्। यदि परमात्मा जीवभिन्नः स्यात् तर्हि घटादिवत् अनात्मत्वेन अनित्य एव स्यात्। यदि आत्मा आनन्दो न स्यात् तर्हि कोऽपि न व्याप्रियेत, इत्यादि व्याप्यारोपेण व्यापकप्रसञ्जनरूपाः तर्काः श्रुत्युक्ताः द्रष्टव्याः। एतच्च मननं निरूपितम्।

एतन्मननं शारीरकद्वितीयाध्यायपठनेन निष्पद्यते।

संशयविरोधिज्ञानं निश्चयः। स च द्विविधः। यथार्थः अयथार्थः च इति। अविसंवादी यथार्थ-निश्चयः। स चोक्त एव।

विसंवादी अयथार्थनिश्चयः। स च द्विविधः। तर्को विपर्ययः च इति। तर्कः तु उक्त एव। विप-र्ययो मिथ्याज्ञानम्। 'अतस्मिंस्तद्बुद्धिरिति यावत्'।

स च द्विविधः। निरुपाधिकः, सोपाधिकः च इति। तत्राद्यो द्विविधः। बाह्यः आभ्यन्तरः च इति। शुक्त्यादौ 'इदं रजतम्' इत्यादि बाह्यः। 'अहमज्ञः', 'ब्रह्म न जानामि' इत्यादि आभ्य-न्तरः।

सोपाधिकः द्विविधः। बाह्यः आभ्यन्तः च इति। लोहितः स्फटिक इत्यादि बाह्यः। आकाशादि-प्रपञ्चभ्रमोऽपि बाह्यः सोपाधिकः कर्माविद्याकार्यत्वात् तत्त्वज्ञानिनः निवृत्तेऽपि अज्ञाने प्रारब्ध-क्षयपर्यन्तं प्रपञ्चोपलब्धिर्शनात्। कर्तृत्वादिभ्रमः आभ्यन्तरः।

स्वप्नोऽपि आभ्यन्तरः सोपाधिकभ्रम एव, न तु स्मृतिः। तथा हि, जाग्रद्भोगप्रदकर्मोपरमे सति स्वप्नभोगप्रदकर्मोद्रेके सकलविषयेन्द्रियादिवासनावासितं निद्रादोषोपप्लुतम् अन्तःकरणं रथादि-विषयाकारेण ग्राहकेन्द्रियाद्याकारेण रथादिविषयाकारवृत्त्याकारेण च परिणमते। अन्तःकरणो-पहितसाक्षी स्वयम् अन्यानवभास्यः तत्सर्वम् अवभासयति। अतः स्वप्ने साक्षिणः स्वप्रकाशत्वं सुविज्ञेयम्। जाग्रदवस्थायां सूर्यादितेजोभिः सङ्कीर्णत्वात् साक्षिणः स्वप्रकाशत्वं दुर्विज्ञेयम्। स्वप्ने तु सूर्यादीनां जाग्रत्पदार्थानाम् उपरतत्वात् स्वयम्प्रकाशत्वं विवेक्तुं शक्यते।

तथा च श्रुतिः, 'स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामुपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति अत्रायं पुरुषो स्वयञ्ज्योतिर्भवति, न तत्र रथा न रथयोगा न पन्थानो भवन्ति। अथ रथान् रथयोगान् पथः सृजत' (बृ.उप. 4.3.9-10) इत्यादिः।

स्वयञ्ज्योतिः स्वप्रकाशः, चैतन्याविषय इति यावत्। एवं स्वप्नोऽनुभवरूप एव, न स्मृतिः। अन्यथा रथं पश्यामि इति अनुभवविरोधप्रसङ्गात्। स्वप्नपदार्थानाम् अन्तःकरणमायाद्वारा शुद्ध-चैतन्याध्यस्तत्वेन इदानीं तत्साक्षात्काराभावेन बाधाभावेऽपि सोपाधिकतया उपाधिनिवृत्त्या तन्निवृत्तिः इति न जाग्रदवस्थायाम् अनुवृत्तिः। कर्मनिद्रोपप्लुतम् अन्तःकरणम् उपाधिः।

केचित्तु स्वप्नाध्यासं निरुपाधिकं वदन्ति। तत्र विरोधिजाग्रत्प्रत्ययेन तन्निवृत्तिः।

पुनश्च विपर्ययः प्रकारान्तरेण द्विविधः। अन्तःकरणवृत्तिरूपः अविद्यावृत्तिरूपः च इति। स्वप्नादिः अन्तःकरणवृत्तिरूपः। रजतादिभ्रमः अविद्यावृत्तिरूपः। संशयः तु अविद्यावृत्तिः एव। तत्रैवं सति निरुपाधिकविपर्ययो निदिध्यासनेन निवर्तते। सोपाधिकस्तु उपाधिनिवृत्त्या। निदिध्यासनं निरूपितमेव। तदपि शारीरकतृतीयाध्यायपठनेन निष्पद्यते।

एवं च श्रवणमननिदिध्यासनैः असम्भावनाविपरीतभावनानिवृत्तौ असति अन्यस्मिन् प्रतिबन्धे तत्त्वमस्यादिवाक्यात्, 'अहं ब्रह्मास्मि' इति अपरोक्षप्रमा जायते। तदुक्तम् 'ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्' (ब्र.सू. 3.4.51) इति।

प्रतिबन्धः त्रिविधः। भूतभाविवर्तमानभेदात्। भूतप्रतिबन्धः पूर्वानुभूतविषयस्य आवेशेन पुनः पुनः स्मरणम्। तदुपाधिकब्रह्मानुसन्धानेन तन्निवृत्तिः। 'यथा भिक्षोः पूर्वानुभूतमहिष्यादिस्मरणेन तत्त्वज्ञानानुत्पत्तौ गुरूपदिष्टतदुपाधिकब्रह्मानुसन्धानेन तन्निवृत्तिः' इति वदन्ति।

भाविप्रतिबन्धो द्विविधः। प्रारब्धशेषः, ब्रह्मलोकेच्छा च इति। तत्र प्रारब्धकर्म द्विविधम्। फलाभिसन्धिकृतं, केवलं चेति। तत्र फलाभिसन्धिकृतं, फलं दत्वैव नश्यति। तस्मिन् सति ज्ञानं न उत्पद्यते, तस्य प्रबलत्वात्। तथा च श्रुतिः, 'स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यते' (बृ.उप. 4.4.5) इति। तादृशप्रारब्धशेषः भाविप्रतिबन्धः।

केवलं प्रारब्धं तत्त्वज्ञानहेतुः पापनिवृत्तिद्वारा। तथा च श्रुतिस्मृती 'धर्मेण पापमपनुदति' (महाना.उप. 77.7), 'ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः' (म.भा. शां.प. 204.1) इति, 'कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तत' इति च। एवं च भाविप्रतिबन्धस्य प्रारब्धशेषस्य भोगेन अनिवृत्तौ सत्यपि श्रवणादौ न ज्ञानोदयः। यथाहुः 'एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिः' (पञ्चदशी 9.45) इति।

ब्रह्मलोकेच्छाया ब्रह्मसाक्षात्कारोत्पत्तिप्रतिबन्धकत्वं विद्यारण्यस्वामिनो वदन्ति स्म। (पञ्चदशी 9.51) -

ब्रह्मलोकाभिवाञ्छायां सम्यक् सत्यां निरुध्यताम्।
विचारयेद्यस्त्वात्मानं न तु साक्षात्करोत्ययम्॥ इति।

स पुनः वेदान्तश्रवणादिमहिम्ना ब्रह्मलोकं गत्वा निर्गुणं ब्रह्म साक्षात्करोति। तथा च श्रुतिः -

वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्वाः।
ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे॥ (मु.उप. 3.2.6) इति। स पुनस्तत्रैवमुच्यते।

वर्तमानप्रतिबन्धं तन्निवृत्त्युपायं च विद्यारण्यस्वामिनः (पञ्चदशी 9.43-44) वर्णयाञ्चक्रुः -

प्रतिबन्धो वर्तमानो विषयासक्तिलक्षणः। प्रज्ञामान्द्यं कुतर्कश्च विपर्ययदुराग्रहः॥

शमाद्यैः श्रवणाद्यैर्वा तत्र तत्रोचितैः क्षयम्। नीतेऽस्मिन्प्रतिबन्धे तु स्वयं ब्रह्मत्वमश्नुत॥ इति।

ततश्च श्रवणादिभिः सकलप्रतिबन्धनिवृत्त्या वाक्याद्ब्रह्मसाक्षात्कारोत्पत्तौ शमदमोपरतितितिक्षाश्रद्धासमाधानमिति अन्तरङ्गसाधनानि।

अन्तरिन्द्रियनिग्रहः शमः। बाह्येन्द्रियनिग्रहो दमः। उपरतिः सन्न्यासः। तितिक्षा द्वन्द्वसहिष्णुता। श्रद्धा गुरुवेदान्तविश्वासः। समाधानं श्रवनादिषु चित्तैकाग्र्यम्। 'शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा आत्मन्येवात्मानं पश्यति' (बृ.उप. 4.4.23) इत्यादि। सूत्रकारोऽपि आह 'शमदमाद्युपेतः स्यात्तथापि तद्विधेस्तदङ्गतया तेषाम् अवश्यानुष्ठेयत्वात्' (ब्र.सू. 3.4.27) इति।

यज्ञादयो बहिरङ्गसाधनानि। 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ.उप. 4.4.22) इत्यादिश्रुतेः। 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' (ब्र.सू. 3.4.26) इत्यप्युक्तम्।

तदेवं मननादिसंस्कृतचितदर्पणसहकृतविचारितमहावाक्योत्पन्नेन 'अहं ब्रह्मास्मि' इति अप्रतिबन्धब्रह्मसाक्षात्कारेण अज्ञाने निवृत्ते सञ्चितकर्मणां नष्टत्वात् आगामिकर्मणाम् अश्लेषात् प्रारब्धापादितविषयम् अनुभवन् मुमुक्षुः अखण्डैकरससच्चिदानन्दब्रह्मात्मना अवतिष्ठते। एतादृशं फलं चतुर्थाध्यायपठनेन सम्भवति इति साम्प्रदायिकानां रीतिः।

अन्ये तु गुरुमुखात् सम्पूर्णशास्त्रपठनं श्रवणं, तस्य पठितस्य युक्तिभिः अनुसन्धानं मननम्, तस्यैव पुनःपुनः आवृत्तिः निदिध्यासनम्, अनन्तरं साक्षात्कार इति आहुः।

वस्तुतस्तु शुद्धसत्त्वानां मुख्याधिकारिणां व्युत्पन्नानाम् अव्युत्पन्नानां च श्लोकेन श्लोकार्धेन वा ब्रह्मसाक्षात्कारो भवति एव शब्दस्य अचिन्त्यशक्तित्वात्। शास्त्रस्य शारीरकादेः मुख्याधिकारिविषयोपपत्तेः। तदुक्तं महाभारते (व.प. 200.109-110) -
आत्मानं विन्दते यस्तु सर्वभूतगुहाश्रयम्। श्लोकेन यदि वार्धेन क्षीणं तस्य प्रयोजनम्॥ इति।

साम्प्रदायिकैः अपि उक्तं, 'वाक्यश्रवणमात्रेण पिशाचवदवाप्नुयात्' (नैष्क. सि. 2.3) इति।

एतावान् अत्र विशेषः। अव्युत्पन्नानां परतन्त्रप्रज्ञत्वात् असम्भावनादिसम्भवाद् ध्याननिष्ठा अपेक्षिता। तदुक्तं भगवता (भ.गी. 13.25) -
अन्येत्वेवमजानन्तः श्रुत्वान्येभ्य उपासते। तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः॥ इति।

विद्यारण्यैरप्युक्तम् (पञ्चदशी 9.54) -
अत्यन्तबुद्धिमान्द्याद्वा सामग्र्या वाऽप्यसम्भवात्।
यो विचारं न लभते ब्रह्मोपासीत सोऽनिशम्॥

मरणे ब्रह्मलोके वा तत्त्वं ज्ञात्वा विमुच्यत॥ इति च।

पतञ्जलिनाप्युक्तम् – 'ततः प्रत्यक्चेतनाधिगमोऽपि अन्तरायाभावश्च' (यो.सू. 1.29) इति। प्रमाणकुशलानां संशयादिग्रस्तानां पण्डितानाम् अपि ध्याननिष्ठा अपेक्षिता। तदुक्तम् – 'अपि च संराधने प्रत्यक्षानुमानाभ्याम्' (ब्र.सू. 3.2.24) इति। अन्यत्रापि उक्तं (पञ्चदशी 9.132) -
बहुव्याकुलचित्तानां विचारात् तत्त्वधीर्न चेत्। योगो मुख्यस्ततस्तेषां धीदर्पस्तेन नश्यति॥ इति

संशयादिरहितानां ध्याननिष्ठा चेत् स्याद् दृष्टं सुखम्। तदुक्तं भगवता (भ.गी. 9.22; 10.9) -
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्। कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥ इति।

न तु ज्ञानिनो ध्यानविधिः। देहाभिमानशून्यतया कर्तृत्वाभावेन तस्य विधिकिङ्करत्वायोगात्। तदुक्तम् – 'अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत्' (ब्र.सू. शां.भा. 2.3.48) इति।

भाष्यकारैः अपि उक्तम् – 'अहं ब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणीति देहेन्द्रियादिषु अहं ममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः' इति,

गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्।
तत्सद्ब्रह्माहमस्मीति बोधे कार्यं कथं भवेत्॥ (ब्र.सू. शां.भा. 1.1.4) इत्युक्तम्।

ज्ञानिनो ध्यानाभावे व्यवहारप्राचुर्याद् दृष्टदुःखमात्रं न मोक्षप्रतिबन्धः। तदुक्तं – 'तन्निष्ठस्य मोक्षोपदेशात्' (ब्र.सू. 1.1.7) इति। तस्मिन् ब्रह्मात्मनि निष्ठा अनन्यव्यापारतया परिसमाप्तिः पर्यवसानं यस्य स तथा तस्य, ज्ञानैकशरणस्य इति यावत्।

तथा भगवानप्याह (भ.गी. 13.23च 18.17) -
य एवं चेत्ति पुरुषं प्रकृतिं च गुणैः सह। सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते॥

यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते। हत्वापि स इमान् लोकान् न हन्ति न निबध्यत॥ इति।

शेषोऽपि (पर.सा. 77) -
हयमेधशतसहस्राण्यथ कुरुते ब्रह्मघातलक्षाणि।
परमार्थविन्न पुणयिर्न च पापैः स्पृश्यते विमल॥ इति।

विद्यारण्यैरप्युक्तम् (पञ्चदशी 6.284) -
पूर्णे बोधे तदन्यौ द्वौ प्रतिबद्धौ यदा तदा। मोक्षः विनिश्चितः किन्तु दृष्टदुःखं न नश्यति॥ इति।

बोधस्य पूर्णत्वावधिः विष्णुपुराणे पराशरेण दर्शितः (1.22.86) -
अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्यजातम्।
ईदृङ्मनो यस्य न तस्य भूयो भवोद्भवा द्वन्द्वगता भवन्ति॥ इति।

ब्रह्मगीतायां ब्रह्माणं प्रति शिवेनापि (सू.सं. 4.5.146) -
अहं हि सर्वं न च किन्चिदन्यन्निरूपणायामनिरूपणायाम्।
इयं हि वेदस्य परा हि हि निष्ठा ममानुभूतिश्च न संशयश्च॥ इति

उपदेशसाहस्रिकायामपि (4.5) -
देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकम्। आत्मन्येव भवेद्यस्य सोऽनिच्छन्नपि मुच्यते॥ इति।

'अयमस्मीति पूरुष' (बृ.उप. 4.4.12) इत्यत्र 'अयम्' इति श्रुतेः। तात्पर्यप्रतिपादनव्याजेन विद्यारण्यैः अपि दर्शितं तृप्तिदीपे (पञ्चदशी 7.19) –
असन्दिग्धाऽविपर्यस्तबोधो देहात्मनीक्ष्यते। तद्वदात्मनि निर्णेतुमयमित्युच्यते पुनः॥ इति।

सर्वथापि श्रवणादिना ब्रह्मसाक्षात्करः, ततो ब्रह्मभावलक्षणा मुक्तिः भवति इति सिद्धम्। 'तमेव विदित्वाऽतिमृत्युमेति' (श्वे.उप. 6.15), 'तरति शोकमात्मवित्' (छा.उप. 7.1.3), 'ब्रह्मवेद ब्रह्मैव भवति' (मु.उप. 3.2.9), 'एवमेवैष सम्प्रादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाऽभिनिष्पद्यते स उत्तमः पुरुषः' (छा.उप. 8.12.3), 'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत्'॥ (बृ.उप. 4.4.12), 'यत्पूर्णानन्दैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो भवति' इति। 'एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत' (भ.गी. 15.20) इत्यादिश्रुतिस्मृतिभ्यः।

शेषोऽप्याह (पर.सा. 83) - वृक्षाग्राच्च्युतपादो यद्वदनिच्छन्नपि क्षितौ पतति।
तद्वद्गुणपुरुषज्ञोऽनिच्छन्नपि केवली भवति॥ इति

॥ इति तृतीयः परिच्छेदः॥

चतुर्थः परिच्छेदः

सा च मुक्तिः द्विविधा। विदेहमुक्तिः, जीवन्मुतिः च इति।

तत्र तत्त्वज्ञानिनः भोगेन प्रारब्धकर्मक्षये वर्तमानशरीरपाते विदेहमुक्तिः। तदुक्तं – 'भोगेनत्वितरे क्षपयित्वा सम्पद्यत' (ब्र.सू. 4.1.19) इति।

अन्ये तु भाविशरीरानारम्भः विदेहमुक्तिः। सा च तत्त्वज्ञानोत्पत्तिसमकाला एव। ज्ञानेन अज्ञाने निवृत्ते सञ्चितकर्मणां नाशात् आगामिकर्मणामश्लेषाद् भोगेन प्रारब्धक्षयात् शरीरान्तरारम्भकस्य असम्भवात् भाविशरीरानारम्भस्य ज्ञानसमकालत्वं युज्यते। तदुक्तम् – (पर.सा. 81) - तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहम्।
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोक॥ इति।

श्रवणादिभिः उत्पन्नसाक्षात्कारस्य विद्वत्सन्न्यासिनः कर्तृत्वाद्यखिलबन्धप्रतिभासनिवृत्तिः जीवन्मुक्तिः। भोगप्रदप्रारब्धप्राबल्येऽपि योगाभ्यासेन तदभिभवात्। प्रारब्धापेक्षया योगाभ्यासस्य प्रबलत्वात्। अन्यथा पुरुषप्रयत्नवैयर्थ्येन चिकित्साशास्त्रमारभ्य मोक्षशास्त्रपर्यन्तस्य अनारम्भप्रसङ्गात्। अत एव पुरुषप्रयत्नस्य साफल्यमाह वसिष्ठः (यो.वा. 2.5.28) -
आबाल्यादलमभ्यस्तैः शास्त्रसत्सङ्गमादिभिः।
गुणैः पुरुषप्रयत्नेन सोऽर्थः सम्पाद्यते हित॥ इति

तत्र श्रुतिस्मृतीतिहासपुराणवचनानि प्रमाणानि। 'विमुक्तश्च विमुच्यत' (कठ.उप. 2.2.2) इति श्रुतिः।

यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते।
यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते॥ (यो.वा. 3.9.7) इति वासिष्ठे

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्। आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च। निर्ममो निरहङ्कारः समदुःखसुखः क्षमी॥

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः। मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥ इति (भ.गी. 2.55, 12.13-14) अत्र जीवन्मुक्त एव भक्त इत्युच्यते।

'प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव' इत्यारभ्य 'गुणातीतः स उच्यत' इत्यन्तेन (भ.गी. 14.22-25) जीवन्मुक्तः दर्शितः।

निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्। अक्षीणं क्षीणकर्माणं तं देवा ब्रह्मणं विदुः॥ इति महाभारते (शा.प. 245.24)

यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः। एवं जाग्रत्प्रपञ्चोऽयं मयि मायाविजृम्भितः॥ इति (सू.सं. 3.5.29)

'यो वेद वेदवेदान्तैः सोऽतिवर्णाश्रमी भवेत्' इति पुराणे (सू.सं. 3.5.20)।

सेऽयं जीवन्मुक्तिः तत्त्वज्ञानवासनाक्षयमनोनाशाभ्यासात् सिध्यति। उत्पन्नस्य तत्त्वज्ञानस्य अभ्यासो नाम पुनःपुनः केनापि उपायेन तत्त्वानुसन्धानम्। तदुक्तम् (यो.वा. 3.22.24) -
तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम्। एतदेक परत्वं च ब्रह्माभ्यासं विदुर्बुधाः॥ इति।

यद्यपि तत्त्वज्ञानात् प्रागपि वासनाक्षयमनोनाशाभ्यासः अपेक्षितः तथापि विविदिषासन्न्यासिन उपसर्जनभूतः सः, श्रवणाद्यभ्यास एव प्रधानः। विद्वत्सन्न्यासिनस्तु तत्त्वज्ञानाभ्यासोर्जनभूतः, वासनाक्षयमनोनाशाभ्यासः तु प्रधान इति अविरोधः।

कृतोपास्तिकस्य मुख्याधिकारिणः तदपेक्षाभावेऽपि अकृतोपास्तेः अस्मदादेः तदभावे चित्तविश्रान्त्यभावात्। उत्पन्नमपि तत्त्वज्ञानं विषयाबाधात् प्रमारूपम् अज्ञाननिवर्तकमपि असम्भावनादिसम्भवात् न सुकरम् इति वासनाक्षयमनोनाशाभ्यासः अपेक्षितः।

वासनासामान्यलक्षणं, तद्विभागं, तत्प्रयोजनं, लक्षणं च वसिष्ठ आह (यो.वा. 5.91.29, 1.13.11-13) -
दृढभावनया त्यक्तपूर्वापरविचारणं। यदादानं पदार्थस्य वासना सा प्रकीर्तिता॥

वासना द्विविधा प्रोक्ता शुद्धा च मलिना तथा। मलिना जन्महेतुः स्याच्छुद्धा जन्मविनाशिनी॥

अज्ञानसुघनाकारघनाहङ्कारशालिनी। पुनर्जन्मकरी प्रोक्ता मलिना वासना बुधैः॥

पुनर्जन्माङ्कुरं त्यक्त्वा स्थिता सम्भ्रष्टबीजवत्। देहार्थं ध्रियते ज्ञातज्ञेया शुद्धेति चोच्यत॥ इति।

तत्र मलिनवासनाः जन्महेतवः अनेकप्रकाराः दर्शिताः (सू.सं. 4.14.51) -
लोकवासनया जन्तोर्देहवासनयापि च। शास्त्रवासनया ज्ञानं यथावन्नैव जायत॥ इति।

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च। अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्॥ (भ.गी. 16.4) इति च।

योषित्पुत्रादिविषयाभिलाषः च मलिनवासनाः द्रष्टव्याः।

विवेकदोषदर्शनसत्सङ्गसन्निधित्यागप्रतिकूलवासनोत्पादनेन उक्तानां मलिनवासनानाम् अन्तःकरणगतानाम् अनुत्पादः वासनायाभ्यासः।

तथैव वसिष्ठादिभिः दर्शितम् -
दृश्यासम्भवबोधेन रागद्वेषादितानवे। रतिर्घनोदिता या तु बोधाऽभ्यासं विदुः परम्॥ इति।

असङ्गव्यवहारित्वाद्भवभावनवर्जनात्। शरीरनाशदर्शित्वाद्वासना न प्रवर्तते॥ (मुक्ति.उप. 2.28) इति च।

नैष्कर्म्येण न तस्यार्थः न तस्यार्थोऽस्ति कर्मभिः। न समाधनजप्याभ्यां यस्य निर्वासनं मनः॥
आत्माऽसङ्गस्ततोऽन्यत् स्यादिन्द्रजालमिदं जगत्। इत्यचञ्चलनिर्णीते कुतो मनसि वासना॥ (पञ्चदशी 9.103-104) इति।

दुःखं जन्म जरा दुःखं मृत्यु दुःखं पुनः पुनः। संसारमण्डलं दुःखं पच्यन्ते यत्र जन्तवः॥ इति इतिहासे।

निःसङ्गता मुक्तिपदं यतीनां सङ्गादशेषाः प्रभवन्ति दोषाः।
आरूढयोगोऽपि निपात्यतेऽधः सङ्गेन योगी किमुताल्पबुद्धिः॥ इति विष्णुपुराणे (4.2.52)।

तथा भागवतेऽपि (9.6.51) -
सङ्गं त्यजेत मिथुनव्रतिनां मुमुक्षुः सर्वात्मना न विसृजेद्बहिरिन्द्रियाणाम्।
एकश्चरेद्रहसि चित्तमनन्त ईशे युञ्जीत तद्व्रतिषु साधुषु चेत्प्रसङ्गः॥ इति।

स्त्रीणां तत्सङ्गिनां सङ्गं त्यक्त्वा दूरत आत्मवान्। क्षेमे विविक्त आसीनश्चिन्तयेन्मामतन्द्रितः॥ इति च।

महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां सङ्गिसङ्गम्।
महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये॥ (भाग. 5.5.2) इति च।

तत्सङ्गे पातित्यमाह (भाग. 11.8.8) -
योषिद्धिरण्याभरणाम्बरादिद्रव्येषु मायारचितेषु मूढः।
प्रलोभितात्मा ह्युपभोगबुद्ध्या पतङ्गवन्नश्यति नष्टदृष्टः॥ इति।

प्रतिकूलवासनाः मैत्र्यादिवासनाः। ताश्च दर्शिताः – 'मैत्रीकरुणामुदितोपेक्षाणां सुखदुःख-पुण्यापुण्यविषयाणां भावनातः चित्तप्रसादानाम्' (यो.सू. 1.33) इति। अस्यार्थः – सुखिप्राणिषु 'एते मदीया' इति मैत्रीं, दुःखिप्राणिषु 'यथा मम दुःखं मा भूत् एवमन्येषामपि दुःखं मा भूत्' इति करुणां, पुण्यकारिषु पुरुषेषु मुदितां, पापिषु उपेक्षां भावयतः रागद्वेषासूयामद-मात्सर्यादिनिवृत्त्या चित्तप्रसादो भवति इति।

तथा दैवीसम्पदभ्यासेन आसुरीसम्पत् नश्यति। दैवी सम्पत् भगवता दर्शिता (भ.गी. 16.1-3) 'अभयं सत्त्वसंशुद्धिः' इत्यारभ्य 'भवन्ति सम्पदं दैवीमभिजातस्य भारत' इत्यन्तेन। 'अमा-नित्वम्' (भ.गी. 13.7) इत्यादिना उक्तामानित्वादिधर्माभ्यासेन तद्विपरीतमानादयो नश्यन्ति। तथा च मैत्र्यादिवासनानां सङ्कल्पपूर्वकम् अभ्यासानन्तरम् अजिह्मत्वादिधर्मान् अभ्यसेत्।

अजिह्मत्वादयः दर्शिताः (ना.परि.उप. 3.62-68) -
अजिह्मः षण्डकः पङ्गुरन्धो बधिर एव च। मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न संशयः॥
इदमिष्टमिदं नेति योऽश्नन्नपि न सज्जते। हितं सत्यं मितं वक्ति तमजिह्मं प्रचक्षते॥

अद्यजातां यथा नारीं तथा षोडशवार्षिकीम्। शतवर्षां च यो दृष्ट्वा निर्विकारः स षण्डकः॥

भिक्षार्थं गमनं यस्य विण्मूत्रकरणाय च। योजनान्न परं याति सर्वथा पङ्गुरेव सः ॥

तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगम्। चतुर्युगं भुवं मुक्त्वा परिव्राट् सोऽन्ध उच्यते॥

हिताहितं मनोरामं वचः शोकावहं च यत्। श्रुत्वापि न शृणोतीव बधिरः स प्रकीर्तितः॥

सान्निध्ये विषयाणां च समर्थोऽविकलेन्द्रियः। सुप्तवद्वर्तते नित्यं स भिक्षुर्मुग्ध उच्यत॥ इति।

तदनन्तरं चिन्मात्रवासनामभ्यसेत्।

नामरूपात्मकस्य जगतः चैतन्ये कल्पितत्वेन स्वतः सत्तशून्यतया चैतन्यसत्तास्फुरणपूर्वक-मेव स्फुरणं भवति। तत्र नामरूपे मिथ्यात्वनिश्चयेन उपेक्ष्य चिन्मात्रोऽहमिति भावयेत्।

सेयं चिन्मात्रवासना द्विप्रकारा। कर्तृकर्मकरणानुसन्धानपूर्विका, केवला चेति। तत्र 'सर्वं जग-च्चिन्मात्रमहं मनसा भावयामि' इति क्रियमाणा प्रथमा। सा सम्प्रज्ञातसमाधिकोटौ अन्तर्भवति। कर्तृकर्मकरणानुसन्धानरहिता 'चिन्मात्रोऽहम्' इति भावना केवला। सर्वस्य चिन्मात्रत्वं शुक्रेण बलिं प्रत्युपदिष्टं (जी.मु.वि. पु. 56) -
चिदिहास्तीह चिन्मात्रं सर्वं चिन्मयमेव तत्। चित्त्वं चिदहमेवेति लोकाश्चिदिति सङ्ग्रहः॥ इति।

द्वितीया असम्प्रज्ञातसमाधिकोटौ अन्तर्भवति। तस्यां चिन्मात्रवासनायां दृढाभ्यस्तायां पूर्वोक्ता

मलिनवासनाः सर्वाः क्षीयन्ते। अयं वासनाक्षयाभ्यासः।

यत्तुसुवर्णादिवत् सावयवं कामादिवृत्तिरूपेण परिणाममानम् अन्तःकरणम्। मननात्मकत्वात् मनः। तच्च सत्त्वरजस्तमोगुणात्मकं तदाश्रयत्वेन सत्त्वरजस्तमोविकाराणां सुखदुःखमोहादीनाम् उपलम्भात्। रजस्तमोवृत्तिभिः उपचीयमानमन्तःकरणं पीनम् आत्मदर्शनायोग्यं भवति इत्यतः तदर्थं वृत्तिनिरोधेन सूक्ष्मतापादनं मनसो नाश इति उच्यते।

तत्साधनानि दर्शितानि (यो.वा. 5.92.35-36) -

अध्यात्मविद्याधिगमः साधुसङ्गम एव च॥ वासनासम्परित्यागः प्राणस्पन्दनिरोधनम्।
एतास्तु युक्तयः पुष्टाः सन्ति चित्तजये किल॥

प्राणनिरोधोपायः दर्शितः (यो.वा. 6-पूर्व. 80.33) -

प्राणायामदृढाभ्यासाद्युक्त्या च गुरुदत्तया। आसनाशनयोगेन प्राणस्पन्दो निरुध्यत॥ इति

प्राणायामप्रकारः दर्शितः -

इडया पिब षोडशिभिः पवनं चतुरुत्तरषष्टिकमौदरिकम्।
त्यज पिङ्गलया शनकैः शनकैः दशभिर्दशभिर्द्यधिकैः॥ इति।

इडया = वामनासिकया, पिब = पूरय, त्यज = रेचय, पिङ्गलया = दक्षिण नासिकया इत्यर्थः।

प्राणायामस्य मनोनाश उपायत्वं श्रुतौ अपि उक्तम् (श्वे.उप. 2.9) -

प्रानान् प्रपीड्येह सुयुक्तचेष्टः क्षीणे प्राणे नासिकयोच्छ्वसीत।
दुष्टाश्वयुक्तमिव वाहमेनं विद्वान्मनो धारयेताप्रमत्त॥ इति।

आसनयोगं तत्साधनं तत्फलं च पतञ्जलिः असूत्रयत् (यो.सू. 2.46-48) – 'स्थिरसुखमासनम्', 'प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्', 'ततो द्वन्द्वाऽनभिघातः'। प्रयत्नशैथिल्यं = लौकिकवैदिककर्मत्यागः। 'फणानां सहस्रेण धरणीं धृत्वा योऽनन्तः वर्तते स एव अहमस्मि' इत्यनुसन्धानम् अनन्तसमापत्तिः। अनया आसनप्रतिबन्धकं दुरितं क्षीयते। आसनाभ्यासस्य फलं द्वन्द्वनिवृत्तिः।

अशनयोगोऽपि दर्शितः -

द्वौ भागौ पूरयेदन्नैर्जलेनैकं प्रपूरयेत्। मारुतस्य प्रचारार्थं चतुर्थमवशेषयेत्॥ इति।

एवं प्राणायामादिना प्राणस्पन्दे निरुद्धे अखिलाः चित्तवृत्तयः निरुध्यन्ते, प्राणस्पन्दाधीनत्वात् चित्तवृत्त्युदयस्य। ततश्च स्वभावत आत्मानात्माकारम् अन्तःकरणम् अनात्माकारवृत्तिनिरोधात् आत्मैकाकारं भवति।

यथाहुः -

आत्माऽनात्माकारं स्वभावतोऽवस्थितं सदा चित्तम्।
आत्मैकाकारतया तिरस्कृतानात्मदृष्टिं विदधीत॥ इति।

अयमेव योगः। यथाहुः 'योगश्चित्तवृत्तिनिरोधः' (यो.सू. 1.2) इति।

तत्साधनं चाहुः 'अभ्यासवैराग्याभ्यां तन्निरोधः' (यो.सू. 1.12) इति। भगवानपि तत्राह (भ.गी. 6.35) -

असंशयं महाबाहो मनो दुर्निग्रहं चलम्। अभ्यासेन तु कौन्तेय वैराग्येन च गृह्यत॥
इति वैराग्यं निरूपितम्।

निरोधो द्विविधः। सम्प्रज्ञातो, असम्प्रज्ञातः च इति। तत्र कर्त्राद्यनुसन्धानं विना चिन्मात्र-

लक्ष्यैकगोचरप्रत्ययप्रवाहः सम्प्रज्ञातसमाधिः। यथाहुः (जी.मु.वि., पु. 69) -
विलाप्य विकृतिं कृत्स्नां सम्भवव्यत्ययक्रमात्।
परिशिष्टं तु चिन्मात्रं सदानन्दं विचिन्तयेत्॥

ब्रह्माकारमनोवृत्तिप्रवाहोहङ्कृतिं विना। सम्प्रज्ञातसमाधिः स्याद् ध्यानाभ्यासप्रकर्षज॥ इति।

अस्य सम्प्रज्ञातसमाधेः अङ्गिनः यमादीनि अष्टाङ्गानि। तत्र यमनियमासनप्राणायामप्रत्याहारा बहिरङ्गानि।

'अहिंसासत्याऽस्तेयब्रह्मचर्यापरिग्रहा यमाः' (यो.सू. 2.30)।

अष्टाङ्गमैथुनवर्जनं ब्रह्मचर्यम्। यथाहुः (कठरुद्र उप. 5.7) -
स्मरणं कीर्तनं केलिः प्रक्षणं गुह्यभाषणम्। सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च॥

एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः। विपरीतं ब्रह्मचर्यमनुष्ठेयं मुमुक्षुभिः॥

सत्सङ्गसन्निधित्यागदोषदर्शनतो भवेत् इति। अत एव स्त्रीसम्भाषणादिनिषेधोऽपि मुमुक्षूणाम् -
न सम्भाषेत्स्त्रियं काञ्चित् पूर्वदृष्टां न च स्मरेत्।
कथां च वर्जयेत्तासां न पश्येल्लिखितामपि॥ इत्यादि (ना.परि.उप. 4.3) स्मृतौ।

'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः' (यो.सू. 2.32)।

आसनं निरूपितम्। तच्च पद्मस्वस्तिकादि अनेकप्रकारम्।

रेचकपूरककुम्भकाः प्राणायामाः। इन्द्रियाणां विषयेभ्यो निवर्तनं प्रत्याहारः। एतेषु बहिरङ्गेषु जितेषु अन्तरङ्गेषु यत्नः कर्तव्यः।

धारणाध्यानसमाधयः सम्प्रज्ञातसमाधेः अन्तरङ्गसाधनानि। धारणा नाम मूलाधारमणिपूरक-स्वाधिष्ठानानाहताज्ञाविशुद्धचक्रदेशानाम् अन्यतरस्मिन् प्रत्यगात्मनि वा चित्तस्य स्थापनम्। तदेकस्मरणमिति यावत्। ध्यानं नाम तत्र प्रत्ययैकतानता। लक्ष्यैकगोचरप्रत्ययप्रवाह इत्ये-तत्।

प्रत्ययप्रवाहो द्विविधः। विजातीयप्रत्ययान्तरितः, तदनन्तरितः च इति। आद्यो ध्यानं, द्वितीयः समाधिः। सोऽपि द्विविधः। कर्त्राद्यनुसन्धानपूर्वकः, तद्रहितः च इति। आद्यो अङ्गसमाधिः। द्वितीयो अङ्गी।

सम्प्रज्ञातसमाध्युदये लयविक्षेपकषायरसास्वादाः चत्वारः विघ्नाः सन्ति। लयः निद्रा। पुनः पुनः विषयानुसन्धानं विक्षेपः। चित्तस्य रागादिना स्तब्धीभावः कषायः। समाध्यारम्भसमये सविकल्पकानन्दास्वादः रसास्वादः। यथाहुः (माण्डूक्य.का. 3.44-45) -
लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत् पुनः। सकषायं विजानीयाद् समप्राप्तं न चालयेत्।
नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत्॥ इति।

अस्यार्थः - प्राणायामादिना लयाभिमुखं चित्तम् उत्थापयेत्। दोषदर्शनब्रह्मानुसन्धानादिना विक्षिप्तं चित्तं शमयेत्। ब्रह्मप्राप्तं चित्तं न चालयेत्। समाध्यारम्भसमये सविकल्पकानन्दं न आस्वादयेत, किन्तु उदासीनः ब्रह्मप्रज्ञया युक्तो भवेत् इति।

एवं निर्विघ्नेन सम्प्रज्ञातसमाध्यभ्यासेन आत्मप्रसादमात्रे मनसि ऋतम्भरा प्रज्ञा उदेति।

अतीतानागतविप्रकृष्टव्यवहितसूक्ष्मवस्तुविषयं योगिप्रत्यक्षम् ऋतम्भरा प्रज्ञा। तामपि निरुद्ध्य समाधिम् अभ्यस्यतः गुणवैतृष्ण्यं परं वैराग्यम् उदेति। तत्तु निरूपितम्। ततोऽपि अभ्यासः कर्तव्यः।

उत्साहः प्रयत्नः अभ्यासः। यथाहुः 'तत्र स्थितौ यत्नोऽभ्यासः' (यो.सू. 1.13) इति। तस्यापि निरोधे सर्वधीनिरोधो भवति। अयमेव असम्प्रज्ञातसमाधिः।

न केवलं परवैराग्यादेव समाधिलाभः, किन्तु ईश्वरप्रणिधानादपि। तथा च उक्तम् – 'ईश्वर-प्रणिधानाद्वा', 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः', 'तस्य वाचकः प्रणवः', 'तज्जपस्तदर्थभावनम्' (यो.सू. 1.23-24, 27-28) इति। एतदुक्तं भवति - ईश्वरप्रणिधानाद्वा समाधिलाभः।

क्लेशादिभिः असम्बद्धः सर्वज्ञः सर्वशक्तिः ईश्वरः। ईश्वरस्याभिधायकः शब्दः प्रणवः।

प्रणवजपः माण्डूक्योपनिषद्पञ्चीकरणतद्वार्तिकोक्तप्रकारेण। प्रणवार्थानुसन्धानं च ईश्वरप्रणि-धानम्।

अथवा 'तद्योऽहं सोऽसौ योऽसौ सोऽहम्' इत्यत्र 'स'शब्देन परमात्मा उच्यते। अहंशब्देन प्रत्यगात्मा उच्यते। अनयोः शब्दयोः सामानाधिकरण्याद् ब्रह्मात्मैक्यमुच्यते ततश्च सोऽहम् इत्यस्य परमात्मा अहम् इत्यर्थो यथा, तथा प्रणवस्यापि'।

तथा हि, सोऽहम् इत्यत्र सकारहकारयोः लोपे कृते परिशिष्टयोः 'ओ अम्' इत्यनयोः सन्धिं कृत्वा उच्चारणे 'ओम्' इति शब्दः निष्पन्नः। तदुक्तम् (मानसोल्लासः 9.43) -
सकारं च हकारं च लोपयित्वा प्रयोजयेत्। सन्धिं च पूर्वरूपाख्यं ततोऽसौ प्रणवो भवेत्॥ इति।

ततश्च ओम् इत्यस्य शब्दस्य परमात्मा अहम् इत्यर्थः।

सर्वथापि प्रणवजपप्रणवार्थानुसन्धानरूपेण ईश्वरप्रणिधानेन परमेश्वरानुग्रहात् समाधिलाभो भवति एव।

एवं समाध्यभ्यासेन अन्तःकरणस्य अतिसूक्ष्मतापादनं मनोनाश इति उच्यते। अनेन सूक्ष्मेण मनसा त्वम्पदलक्ष्ये साक्षात्कृते महावाक्येन स्वस्य ब्रह्मत्वसाक्षात्कारो भवति। न केवलं समा-धिना एव ब्रह्मसाक्षात्कारः किन्तु विवेकेनापि भवति। अन्तःकरणतद्वृत्तीनामवभासकोऽयं चिदात्मा साक्षी, तस्मिन् साक्षात्कृते वाक्याद् ब्रह्मसाक्षात्कारः सम्भवत्येव। तदाह (यो.वा. 5.78.8, 6.13.8) -
द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव। योगो वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणम्॥

असाध्यः कस्यचिद्योगः कस्यचिज्ज्ञाननिश्चयः। प्रकारौ द्वौ तदा देवो जगाद परमेश्वरः॥ इति।
ज्ञानं = विवेकः।

तृतीयाध्याये – 'इन्द्रियाणि पराण्याहुः' इत्यारभ्य 'कामरूपं दुरासदम्' (भ.गी. 3.42-43) इत्यन्तेन विवेकं, षष्ठाध्याये योगं च, 'यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यत' (भ.गी. 5.5) इति च देवः सर्वज्ञः परमेश्वरः भगवान् द्वौ प्रकारौ जगाद, इति श्लोकार्थः। तदेवं तत्त्व-ज्ञानवासनाक्षयमनोनाशाभ्यासात् जीवन्मुक्तिः सिध्यति इति सिद्धम्।

तस्या जीवन्मुक्तेः पञ्चप्रयोजनानि सन्ति। ज्ञानरक्षा, तपः, विसंवादाभावः, दुःखनिवृत्तिः, सुखाविर्भावः च इति।

तत्र उत्पन्नब्रह्मसाक्षात्कारस्य पुंसः पुनः संशयविपर्ययानुत्पादो ज्ञानरक्षा। तथा हि - ज्ञानिनां शुकराघवनिदाघादीनामिव अकृतोपास्तेः ज्ञानिनः अस्मदादेः चित्तविश्रान्त्यभावात् पुनः कदाचित् संशयविपर्ययौ सम्भवेताम्। अज्ञानवत् तावपि मोक्षप्रतिबन्धकौ। तदाह भगवान् – 'अज्ञश्चाश्रद्धधानश्च संशयात्मा विनश्यति' (भ.गी. 4.40) इति।

ततश्च जीवन्मुक्त्यभ्यासेन सम्भवति संशयविपर्ययनिवृत्तिः। ज्ञानरक्षा नाम प्रथमं प्रयोजनम्।

चित्तैकाग्र्यं तपः।

मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः।
स ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यत॥ इति (महाभारत, शां.प. 240.14, 237.4) स्मरणात्।

ज्ञानिनो जीवन्मुक्तस्य अखिलवृत्तीनामनुदयात् निरङ्कुशं चित्तैकाग्र्यं सम्पद्यते, तदेव तपः। तच्च लोकसङ्ग्रहाय भवति। तदुक्तं – 'लोकसङ्ग्रहमेवापि सम्पश्यन् कर्तुमर्हसि' (भ.गी. 3.20) इति।

सङ्ग्राह्यो लोकः त्रिविधः। शिष्यः, भक्तः, तटस्थः च इति।

तत्र सन्मार्गवर्ती शिष्यः गुरूपदिष्टमार्गेण श्रवणादिना ब्रह्मसाक्षात्कुर्वन् मुच्यते। आचार्यवान् पुरुषो वेद। तस्य तावदेव चिरं यावन्न विमोक्ष्ये। अथ सम्पत्स्य'। (छा.उप. 6.14.2) इति श्रुतेः।

भक्तोऽपि ज्ञानिनः पूजान्नपानदिना अभीष्टं प्राप्नोति। तथा च श्रुतिः (मु.उप. 3.1.10) -
यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान्।
तं तं लोकं जयते तांश्च कामान् तस्मादात्मज्ञं ह्यर्चयेद्भूतिकाम॥ इति।

स्मृतिरपि -
यद्येको ब्रह्मविद् भुङ्क्ते जगत्तर्पयतेऽखिलम्। तस्माद् ब्रह्मविदे देयं यद्यस्ति वसु किञ्चन॥ इत्यादि।

तटस्थः द्विविधः। सन्मार्गवर्ती, असन्मार्गवर्ती चेति। तत्र सन्मार्गवर्ती, मुक्तस्य सदाचारे प्रवृत्तिं दृष्ट्वा स्वयमपि तत्र प्रवर्तते। तदाह भगवान् (भ.गी. 3.21) -
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तत॥ इति।

असन्मार्गवर्ती तु जीवन्मुक्तस्य दृष्टिपातेन सर्वपापैः प्रमुच्यते। तथा च स्मृतिः (सू.सं. 2.20.44) -
यस्यानुभवपर्यन्ता बुधिस्तत्त्वे प्रवर्तते। तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैः॥ इति।

द्वेषिणस्तु ज्ञानिनः दुष्कृतं सम्भावितं गृह्यन्ति। तथा च श्रुतिः 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्या द्विषन्तः पापकृत्याम्' (ब्र.सू. शां.भा. 3.3.26) इति। एवं जीवन्मुक्तस्य तपः लोकसङ्ग्रहाय भवति इति। तपो नाम द्वितीयं प्रयोजनम्।

जीवन्मुक्तस्य व्युत्थानदशयाम् असत्कृतनिन्दादिश्रवणेऽपि पाखण्डकृतनिष्ठुरादिदर्शनादौ अपि चित्तवृत्त्यनुदयात् विसंवादो न भवति। यथाहुः -
ज्ञात्वा सदा तत्त्वनिष्ठन् अनुमोदामहे वयम्। अनुशोचाम एवान्यान् न भ्रान्तैर्विवदामह॥ इति।

विसंवादाभाव नाम तृतीयं प्रयोजनम्।

दुःखनिवृत्तिः द्विविधा। ऐहिकदुःखनिवृत्तिः, आमुष्मिकदुःखनिवृत्तिः च इति।

तत्र ज्ञानेन भ्रान्तेः निवृत्ततया योगाभ्यासेन अखिलवृत्तिनिरोधेन चित्तस्य आत्मैकाकारतया ऐहिकसमस्तदुःखनिवृत्तिः प्रारब्धभोगे सत्यपि। तथा च श्रुतिः 'आत्मानं चेद्विजानीयात्' (बृ.उप. 4.4.12) इत्यादिना ऐहिकदुःखनिवृत्तिं मुक्तस्य दर्शयति।

ज्ञानेनाज्ञाननिवृत्त्या सञ्चितागामिकर्मणाम् अश्लेषविनाशाभ्याम् आमुष्मिकदुःखानामपि निवृत्तिः। तथा च श्रुतिः 'एतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवम्' (तै.उप. 2.9.1) इत्यादि। दुःखनिवृत्तिर्नाम चतुर्थं प्रयोजनम्।

मुक्तस्य ज्ञानयोगाभ्यासे अज्ञानतत्कृतावरणविक्षेपनिवृत्त्या बाधकाभावात् परिपूर्णब्रह्मानन्दानुभवसुखाविर्भावः। इममेव अर्थं श्रुतिः दर्शयति (मै.उप. 6.34) -
समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत्।
न शक्यते वर्णयितुं गिरा तदा स्वयं तदन्तःकरणेन गृह्यत॥ इति।

सुखाविर्भावो नाम पञ्चमं प्रयोजनम्।

एवं स्वरूपप्रमाणसाधनफलनिरूपणैः द्विधा मुक्तिः निरूपिता। तमाद् ब्रह्मविज्जीवन्मुक्तः भोगेन प्रारब्धकर्मणि क्षीणे वर्तमानशरीरपाते अखण्डैकरसब्रह्मानन्दात्मना अवतिष्ठते। 'न तस्य प्राणा उत्क्रामन्ति' (बृ.उप. 4.4.6), 'अत्रैव समवनीयन्ते' (बृ.उप. 3.2.11) 'ब्रह्मैव सन् ब्रह्माप्येति' (बृ.उप. 4.4.6), 'ब्रह्मवेद ब्रह्मैव भवति' (मु.उप. 3.2.9),

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥

तद्भावभावमापन्नस्ततोऽसौ परमात्मना। भवत्यभेदो भेदश्च तस्याज्ञानकृतो भवेत्॥ इत्यादि (वि.पु. 6.7.94,93) श्रुतिस्मृतिशतेभ्यः।

भगवान् सूत्रकारोऽपि आह – 'अस्मिन्नस्य च तद्योगं शास्ति' (ब्र.सू. 1.1.19) इति। तस्मात् अहं ब्रह्मास्मि इति तत्त्वमस्यादिवाक्यजन्यज्ञानात् ब्रह्मभावलक्षणो मोक्षो भवति इति सिद्धम्। 'न च पुनरावर्तते' (छा.उप. 8.15.1),

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः। गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥ (भ.गी. 5.17) इत्यादि श्रुतिस्मृतिभ्यः।

श्रीमत्स्वयम्प्रकाशाख्यगुरुणा करुणावशात्।
उपदिष्टं परात्मैक्यं तत्त्वमावेदितं मया॥

ब्रह्मेशविष्ण्वादि समस्तदेवाः स्वस्वाधिकारेषु विभीतचित्ताः।
आज्ञावशाद्यस्य वसन्ति सर्वे तं कृष्णमाद्यं शरणं प्रपद्ये॥

या भारती शर्वविरिञ्चिविष्णुदेवादिभिर्नित्यमुपास्यमाना।
सदाक्षमालाविलसत्कराग्रां वाग्वादिनीं तां प्रणमामि देवीम्॥

आकाशपुष्पमिव विश्वमहं निरीक्षे मग्नोऽस्मि नित्यसुखबोधरसामृताब्धौ।
प्रत्यञ्चमद्वयमनन्तसुखैकबोधं साक्षात्करोमि पदभावनया गुरूणाम्॥

यत्पादयुग्मकमलाश्रयणं विनाहं संसारसिन्धुपतितः सुखदुःखभाक् स्याम्।
यत्पादयुग्मकमलाश्रयणात् सुतीर्ण स्तद्देशिकाङ्घ्रिकमलं प्रणतोऽस्मि नित्यम्॥

परमसुखपयोधौ मग्नचित्तो महेशं हरिविधिसुरमुख्यान् देशिकं देहिमात्रम्।
जगदपि न विजाने पूर्णसत्यात्मसंवित् सुखतनुरहमात्मा सर्वसंसारशून्यः॥

यदुकुलवररत्नं कृष्णमन्यांश्च देवान् मनुजपतिमृगादीन् ब्राह्मणादीन्न जाने।

परमसुखसमुद्रे मज्जनात्तन्मयोऽहं गलितनिखिलभेदः सत्यबोधैकरूपः॥

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीमत्स्वयम्प्रकाशानन्दसरस्वतीपूज्यपादशिष्य

भगवन्महादेवसरस्वतीमुनि विरचिते तत्त्वानुसन्धाने चतुर्थः परिच्छेदः॥

॥ समाप्तश्चायं ग्रन्थः॥